पंतीदु मतदीपीकाग ञोक

1

श्रीमते रामानुजाय नमः ॥ श्रीवेंकटेशं करिशैलनाथं श्रीदेवराजं घटिकाद्रिसिंहम् ॥ कृष्णेन साकं यतिराजमीडे स्वप्ने
च दृष्टान् मम देशिकेन्द्रान् ॥१॥ यतीश्वरं प्रणम्याहं वेदाचार्य्यं महागुरुम् करोमि बालबोधार्थं यतीन्द्रमदीपिका
म् ॥२॥ श्रीमन्नारायण एव चिदचिद्विशिष्टाद्वैततत्वम् भक्तिप्रपत्तिभ्यां प्रसन्नः ॥ स एव उपायः । अप्राकृतदे
शविशिष्टः स एव प्राप्य इति वेदान्तवाक्यैः प्रतिपादयतां व्यासबोधायनगुहदेवभारुचिब्रह्मनन्दिद्रविडाचार्य्यश्री
परांकुशनाथयामुनमुनियतीश्वरप्रभृतीनां मतानुसारेण बालबोधार्थं वेदान्तानुसारिणी यतिपतिमतदीपिकाख्या
शारीरकपरिभाषा महाचार्य्यकृपावलंबिना मया यथामति संग्रहेण प्रकाश्यते ॥ सर्वं पदार्थजातं प्रमाणप्रमेयभेदेन
द्विधाभिन्नं प्रमाणानि त्रीण्येव प्रमेयं द्विविधम् ॥ द्रव्याद्रव्यभेदात् ॥ द्रव्यं द्विविधम् । जडमजडमिति ॥ जडं च द्वेधा । प्रकृतिः
कालश्चेति ॥ प्रकृतिश्चतुर्विंशत्यात्मिका । कालस्तु उपाधिभेदात्त्रिविधः ॥ अजडं द्विविधं पराक् प्रत्यक् इति । अजडं प
धाम राग्द्विधा । नित्यविभूतिः । धर्मभूतज्ञानं चेति । प्रत्यगपि द्विविधः । जीवेश्वरभेदात् । जीवस्त्रिविधः । बद्धमुक्तनित्यभे
प्रपन्नो २ दात् । बद्धो द्विविधः । बुभुक्षुमुमुक्षुभेदात् । बुभुक्षुर्द्विविधः । अर्थकामपरो धर्मपरश्चेति ॥ धर्मपरो द्विविधः । देवतान्तरपरो भग
वत्परश्चेति । मुमुक्षुर्द्विविधः । कैवल्यपरो मोक्षपरश्चेति ॥ मोक्षपरो द्विविधः । भक्तः प्रपन्नश्चेति । प्रपन्नो द्विविधः । एकान्ती परमै
कान्ती द्विविधः ॥ इष्टानिष्टभेदात् । पञ्चधावस्थित ईश्वरः ॥ परव्यूहविभवान्तर्याम्यर्चावतारभेदात् ॥१॥ परएकधा ।

तित्र परमैकांति १

परं [illegible] व्याप्ता [illegible] १

श्री [illegible] इति २

द्रव्यग्रहणेसंयोगःसंबंधः ई त्रुटिः;

निचीनि· अत्रसाक्षात्कारिप्रमाकरणं प्रत्यक्षं ॥ अनुमानादिव्यावृत्त्यर्थं साक्षात्कारि इति दुष्टेन्द्रियजन्यावृत्त्यर्थं प्रमेति ॥ तच्च प्रत्यक्षं द्वि
धम् ॥ निर्विकल्पकसविकल्पभेदात् ॥ निर्विकल्पकं नामगुणसंस्थानादिविशिष्टप्रथमपिण्डग्रहणम् ॥ सविकल्पकन्तु सप्रत्ययमर्पि
णसंस्थानादिविशिष्टद्वितीयादिपिंडज्ञानम् ॥ उभयविधमप्येतत् विशिष्टविषयमेव · अविशिष्टग्राहिणो ज्ञानस्यानुपलं
भादनुपपत्तेश्च ॥ ग्रहणप्रकारस्तु ॥ आत्मा मनसा संयुज्यते मन इन्द्रियेणेन्द्रियमर्थेन इन्द्रियाणां वस्तुप्राप्यप्रकाशकारित्वनि
यमात् · अतो घटादिरूपार्थस्य चक्षुरादिरूपेन्द्रियस्य च सन्निकर्षे सति अयं घटः पट इति चाक्षुषज्ञानं जायते · एवमेव स्पार्शनप्र
त्यक्षादयोपि ॥ द्रव्यगतरूपादिग्रहणे समवायानंगीकारात् संयुक्ताश्रयणसंबंधः (द्रव्यग्रहणेसंयोगःसंबंधः)· निर्विकल्पकस
2 विकल्पभेदभिन्नं प्रत्यक्षं द्विविधम् ॥ अर्वाचीनं अनर्वाचीनं चेति ॥ अर्वाचीनं पुनर्द्विविधम् ॥ इन्द्रियसापेक्षं तदनपेक्षं चेति ॥
तदनपेक्षं द्विविधम् · स्वयंसिद्धं दिव्यं चेति · स्वयंसिद्धं योगजन्यम् · दिव्यं भगवत्प्रसादजन्यम् ॥ अर्वाचीनं तु इन्द्रियानपेक्षं मुक्त
नित्येश्वरज्ञानम् ॥ अनर्वाचीनं तु प्रसंगादुक्तं एवं साक्षात्कारिप्रमाकरणं प्रत्यक्षमिति सिद्धम् ॥ ननु यथावस्थितव्यवहारानुगुण
ज्ञानं प्रमेत्युक्तम् ॥ एवं च स्मृतेरपि यथावस्थितव्यवहारानुगुणत्वेन प्रामाण्यात् स्मृतेरपि प्रमाणत्वेन परिगणनाच्च ॥ त्रीण्येव प्रमाणा
नीति कथं प्रतिपाद्यते इति चेत् उच्यते स्मृतेः प्रामाण्यांगीकारेपि संस्कारसापेक्षत्वात् · तस्य प्रत्यक्षमूलभूतत्वान्मूलभूतप्रत्यक्षेऽन्तर्भा
वइति ॥ न पृथक्प्रमाणकल्पनम् ॥ अतस्त्रीण्येवेति संभवन्ति ॥ स्मृतिर्नाम पूर्वानुभवजन्योद्बुद्धसंस्कारमात्रजन्यज्ञानम् ॥ संस्का
रोद्बोधश्च सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः इत्युक्तप्रकारेण क्वचित्सदृशादर्शनाद्भवति · क्वचिददृष्टात् क्वचिच्चिं

व्यूहश्चतुर्धा· वासुदेवसंकर्षणप्रद्युम्नानिरुद्धभेदात्।। केशवादिव्यूहान्तरम्। मत्स्यादयो विभवाः पुनरनन्ताश्च· अन्त
र्यामि प्रतिशरीरमवस्थितः।। अर्चावतारस्तु।। श्रीरंगवेंकटाद्रिहस्तिगिरियादवाद्रिघटिकाचलादिषु सकलमनुजनय
नविषयतां गता मूर्तिविशेषः।। अप्रकृतं तु।। सत्त्वरजस्तमशब्दस्पर्शरूपरसगंधसंयोगशक्तिभेदाद्दशैव।। एवमुद्दिष्टानां
उद्देशक्रमेण लक्षणपरीक्षे क्रियेते।। तत्र प्रमाकरणं प्रमाणं० प्रमाणलक्षणम्।। प्रमाकरणत्वं लक्षणम्। यथावस्थितव्य
वहारानुगुणं ज्ञानं प्रमा० प्रमालक्षणं· यथावस्थितव्यवहारानुगुणं ज्ञानं प्रमेत्युक्ते शुक्तिकायामिदं रजतमिति ज्ञानेऽतिव्याप्तिः। अ
त उक्तं व्यवहारानुगुणं ज्ञानमिति० एवमपि तत्रातिव्याप्तिः। भ्रान्तिदशायामिदं रजतमिति व्यवहारप्रमाणत्वात्।। अत उक्तं यथावस्थि
तेति· लक्षणं यथावस्थितेति पदेन संशयान्यथाज्ञानविपरीतज्ञानव्यावृत्तिः।। धर्मिग्रहणे सति धर्मविरुद्धानेकविशेषस्मरणं संश
यः।। यथा ऊर्द्ध्वतावविशिष्टे स्थाणुर्वा पुरुषो वेति ज्ञानम्।। अन्यथाज्ञानं नाम धर्मविपर्यासः।। यथा कर्तृत्वेन भासमाने आत्मनि [illegible]
मिः कर्तृत्वस्य स्वातंत्र्योपपादनम्।। विपरीतज्ञानं धर्मिविपर्यासः।। यथा वस्तुनो वस्त्वन्तरज्ञानं।। लक्षणे [illegible] त्रीणि दूषणानि सन्ति·
अव्याप्तिरतिव्याप्तिरसंभवश्चेति।। लक्ष्यैकदेशे लक्षणस्यावर्त्तमानत्वमव्याप्तिः।। लक्ष्यादन्यत्र प्रवर्त्तमानत्वमतिव्याप्तिः।। लक्ष्ये क्वाप्यवर्त्त
मानत्वमसंभवः। यथा चक्षुर्विषयो जीव इत्युक्ते असंभव एव· अत्रोक्तदूषणत्रयाभावात् प्रमालक्षणं सुस्थम्।। साधकतमं करणम्·
अतिशयितं साधकं साधकतमम्· यस्मिन्सत्यविलंबेन ज्ञानमुत्पद्यते तदतिशयितमित्युच्यते· तेन प्रमाकरणं प्रमाणमिति सिद्धम्।।
अनधिगतार्थगंतृ प्रमाणमित्यादिकं तु तत्त्वटीकादिभिरेव निरस्तत्वादनादरणीयम्।। तानि प्रमाणानि प्रत्यक्षानुमानशब्दाख्या

प.का.
३

नयनतिः क्रान्ततयास्तेनैवमवच्छेते॰ नत्वन्यैः जपाकुसुमसमीपवर्त्तिस्फटिकमणेरपि रक्तता गृह्यते ॥ तज्ज्ञानं सत्यमेव॰ मरीचिका
यां जलज्ञानमपि पंचीकरणप्रक्रियया पूर्वोक्तवदुपपद्यते ॥ पंचीकरणप्रक्रिया तु उत्तरत्र वक्ष्यते॰ दिग्भ्रमोपि तथैव॰ दिशि दि
गन्तरस्याविद्यमानत्वात्॥ अवच्छेदकमन्तरेण दिग्गतिद्रव्यान्तरानंगीकाराच्च॰ आलातचक्रादौ तु शैघ्र्यादन्तरालाग्रहणा
त त्तत्तद्देशसंयुक्ते तत्तद्वस्तुन एव चक्राकारेण ग्रहणम्॥ तदपि सत्यं दर्पणादिषु निजमुखादिप्रतीतिरपि यथार्था॰ दर्पणादिप्रतिहतं
तयोर्नयनरश्मयो दर्पणादिग्रहणपूर्वकं निजमुखादि गृह्णन्ति॰ तत्राप्यतिशैघ्र्यादन्तरालाग्रहणान्यथाप्रतीतिः॥ द्विचंद्र
ज्ञानादावपि अंगुल्यवष्टंभतिमिरादिभिर्नायनतेजोगतिभेदेन सामग्रीभेदात्॥ सामग्रीद्वयमन्योन्यनिरपेक्षम्॥ चंद्रद्वयग्रहणे हे
३ तुर्भवति॰ सामग्रीद्वयं पारमार्थिकं तेन द्विचंद्रज्ञानं भवति॥ अतः सर्वं ज्ञानं सत्यं सविशेषविषयत्वं॥ निर्विशेषवस्तुनो अग्रहणात्॰
एवंभूते प्रत्यक्षे प्रथमतो भेदविशिष्टमेव गृह्णाति॰ भेदव्यवहारे तु प्रतियोग्यपेक्षा न तु स्वरूपे॰ तेन अनवस्थान्योन्याश्रय
दोषोपि नास्ति॥ उपजीव्यपेक्षानवस्था॰ परस्परापेक्षा अन्योन्याश्रयः॥ ननु तत्त्वमसीत्यत्र प्रत्यक्षं किं न स्यादिति चेन्न॰
त्वमिति चेतनस्य प्रत्यक्षेपि दशमोहमित्यस्य वाक्यजन्यत्वात्॥ यदि दशमोहमित्यस्य प्रत्यक्षविषयत्वं तर्हि धर्मवांस्त्वमसीत्येतस्यापि
प्रत्यक्षत्वं स्यात्॰ अंगीकारे अतिप्रसंगात्॥ अत एव तत्त्वमसीतिवाक्यस्य नापरोक्षज्ञानजनकत्वम्॥ एतेन प्रत्यक्षप्रमाकरणम्॥ प्रमा
णम्॰ प्रमा च आत्मचैतन्यमेव॥ चैतन्यं च त्रिविधम्॥ अन्तःकरणावच्छिन्नचैतन्यं॰ अन्तःकरणानवच्छिन्नचैतन्यं विषयाव
च्छिन्नचैतन्यं चेति॥ पदार्थानामैकं तदाभासा कृतिः सापि निर्विशेषविषया एव॥ अभेदमेव गृह्णातीत्यादिकं तुच्छकल्पना॥

भेदज्ञाने सति प्रतियोगिज्ञानं प्रतियोगिज्ञाने सति भेदज्ञानं ६

३

६२

तथा आदिमध्येन सांहचर्यस्यापि ग्रहणात् तेनापि भवति। साहचर्ये यथा देवदत्तयज्ञदत्तयोः देवदत्तदर्शनेन यज्ञदत्तस्मृतिः॥ द्वितीया यथा
यादृच्छिककालान्तरानुभूतश्रीरंगादिदिव्यदेशस्मृतिः॥ तृतीया यथा चिन्त्यमाने सति श्रीवेंकटेशस्य कमनीयदिव्यमंगल
विग्रहस्मृतिः॥ चतुर्थी तु सहचरितयोरेकदर्शनेन तयोः अन्यतरदर्शनेन तदन्यतरस्मृतिः॥ सम्यक् पूर्वमनुभूतस्य सर्वस्यास्य
ति विषयत्वनियमः॥ क्वचित् कालदेशात् आदिना ... प्रमाणस्य स्वभावः॥ यथा स्मृतेः प्रत्यक्षेऽन्तर्भावः। तथा सोऽयं देवद
त्त इति प्रत्यभिज्ञाया अपि प्रत्यक्षेऽन्तर्भावः॥ प्रत्यक्षमते अभावस्य भावान्तररूपत्वात्। तत्त्वज्ञानस्यापि प्रत्यक्षेऽन्तर्भावः॥ भूतले घटा
भावो भूतलमेव॥ ... एतदभिप्रायः॥ उक्तं च किं
... प्रत्यक्षेऽन्तर्भावः॥ ... यथार्थमिति वे
दान्तविदांमतम् ... यथार्थमेव॥ ... अन्यथाख्याति ... आतिवादिनः
... सत्त्वम्॥ तर्हि भ्रम ... बाधात्। भ्रमत्वं तदुपपा
दयामः। पंचीकरणप्रक्रियया पृथिव्यादिषु सर्वेषु सर्वभूतानां विद्यमानत्वात्। अतएव शुक्तिकादौ रजतांशस्य विद्यमानत्वात्।
तत्ज्ञानं न भ्रमः। शुक्तौ शुभ्रस्य ... तुल्यत्वात् ... सत्ता न ...
न परमपुरुषः ... पीतः शंख इत्यादौ नयनवर्ति पीतद्रव्यसंभिन्नानां नयनरश्मयः ... संयुज्यन्ते
तत्र पित्तगतपीतिमाभिभूतः शंखगतशौक्ल्यमानत्वात् ... पीतिमास्य

यत्रेपापार्जकत्वंतत्रे२ — श्यामत्वं न — अयं मैत्रीतनयः यत्र यत्र श्यामत्वं तत्र तत्र शाकपाकजत्वं नास्तीति गौरे व्यभिचारात् २ पा ५
इति साध्यव्यापकता यत्र मैत्रीतनयत्वं तत्र शाकपाकजत्वं

निर्धूम इति। सेयमुभयविधा व्याप्तिरूपाधिसंभवे दुष्यति॥ साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वम्॥ यथा वह्निना धूमे सा
ध्यमाने आर्द्रेंधनमुपाधिः॥ मैत्रीतनयत्वेन श्यामत्वे साध्यमाने शाकपाकजत्वमुपाधिः॥ स चोपाधिर्द्विविधः। निश्चितः शंकितश्चेति॥
निश्चितो यथा विप्रतिपन्ना सेवा दुःखहेतुः॥ सेवात्वात्॰ राजसेवावत्॥ इत्यत्र पापार्जकत्वमुपाधिः॥ अयं च ईश्वरसेवायां नास्तीति॰
निश्चयादयं निश्चितोपाधिः॥ शंकितो यथा विप्रतिपन्नो जीवः। एतच्छरीरावसाने मुक्तिमान्॥ निष्पन्नसमाधित्वात्॥ शुकादिवत्॥ इत्य
त्र कर्मक्षयवत्त्वमुपाधिः॥ स च निष्पन्नसमाधौ विप्रतिपन्ने जीवे अस्ति नास्तीति संदिग्धत्वात् शंकितोपाधिः॥ अतो निरूपाधिकसंबं
धवत्त्वं व्याप्यमिति सिद्धम्॥ व्याप्यं साधनं लिंगमित्यनर्थान्तरं तस्य द्वे रूपे॥ अनुमित्यंगभूते व्याप्तिः पक्षधर्मता चेति॥ पञ्चरूपाण्यपि संति॰
तानि च पक्षव्यापकत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिः। अबाधितविषयत्वं असत्प्रतिपक्षत्वं चेति॥ सिसाधयिषितधर्मविशिष्टो धर्मी पक्षः॥ यथा
अग्निमत्त्वादिसाधने पर्वतादिः॥ सिसाधयिषितसजातीयधर्मवान् सपक्षः॥ यथा महानसादिः॥ साध्यतज्जातीयशून्यो विपक्षः॥ यथा मह
ह्रदः॥ प्रबलेन प्रमाणेन पक्षे निश्चितसाध्याभावत्वं बाधितविषयत्वम्॥ यथा महाह्रदो अग्निमानित्यादि॥ तदभावस्त्व बाधितविषय
त्वम्॥ समबलया प्रमीयमाणे प्रमाणे परोधाभावो सत्प्रतिपक्षत्वम्॥ एवंभूतं व्याप्यं द्विविधम्॥ अन्वयव्यतिरेकि केवला
न्वयि भेदात्॥ पूर्वोक्तं पञ्चरूपोपपन्नं व्याप्यम्॥ अन्वयव्यतिरेकि यथा पर्वतो ऽग्निमान् धूमवत्त्वात्॰ यो यो स सो ऽग्निमान्॥ यथा
महानसः॥ योऽनग्निः स निर्धूमः॥ यथा महाह्रदः॥ इत्ति॥ तादृशमेव विपक्षरहितं व्याप्यम्॥ केवलान्वयि यथा ब्रह्मशब्दवाच्यं वस्तु
त्वात्॥ घटवत्॥ विपक्षाभावात् केवलान्वयी॰ चतूरूपोपपन्नः॥ केवलव्यतिरेकिणो साध्याप्रसिद्धेः तद्व्यतिरेके व्याप्तिर्दुर्ग्रहा॥

रस्ता॰ निर्विकल्पकेनु नामजात्यादियोजनाहीनं वस्तुमात्रावगाहि किंचिदिदमित्यादिनै याव कोलेकिरस्तम्॥ ननु काणादपाणिनीये च सर्व
शास्त्रोपकारकमिस्तुक्तत्वात्कथं गौतममतनिरासः क्रियते इति चेदुच्यते॰ नास्माभिः कात्स्न्येन तस्य मतस्य निरासः क्रियते॥
यावद्विरुद्धकियुक्तं तावत्स्वीक्रियते परकल्पितं तटाकेजीवनवत्॥ नखलु तटाकेस्थः पंकोपि स्वीक्रियते॥ अतः परमाणुकारण
त्वं वेदपौरुषेयत्वं ईश्वरानुमानिकत्वं जीवविभुत्वं सामान्यसमवायविशेषाणां पदार्थान्तरत्वेन स्वीकारः॥ उपमानादेः पृ
थक्प्रमाणत्वकल्पनं संख्यापरिमाणपृथक्त्वपरत्वापरत्वगुरुत्वद्रवत्वादीनां पृथक्गुणत्वकल्पनं दिशोपि द्रव्यत्वकल्पनं इत्या
दिसूत्रकारादिविरुद्धप्रक्रिया नास्माभिः स्वीक्रियते इति न विरोधः॥ इति श्रीवाधूलकुलतिलकश्रीमन्महाचार्यस्य प्रथमदासेन
श्रीनिवासदासेन विरचितायां यतींद्रमतदीपिकायां प्रत्यक्षनिरूपणं नाम प्रथमोऽवतारः॥ अथानुमानं निरूप्यते॰ व्याप्य
ाप्य५ स्यत्वानुसंधानात् व्यापकविशेषप्रमितिरनुमितिः। तत्करणमनुमानं व्याप्यस्य धूमस्य अग्निव्याप्यत्वानुसंधानात् व्या
पकविशेषप्रमितिः वह्निप्रमितिः॥ अनौपाधिकदेशकालनियतं व्याप्यम्॥ अन्यूनदेशकालवृत्ति व्यापकम्॥ तदिदमविनाभू
ते व्याप्यम्॥ तस्मिति संबंधि व्यापकमिति॥ तेन निरूपाधिकृतयानियतसंबंधो व्याप्तिरित्युच्यते॥ सेयं यत्र धूमस्तत्र वह्निरिति
व्याप्तिर्भूयोदर्शनाद्गृह्यते॥ व्याप्तिर्द्विविधा॰ अन्वयव्यतिरेकभेदात्॥ साधनविधौ साध्यविधिरूपेण प्रवृत्ता व्याप्तिरन्वयव्या
प्तिः॥ यथा यो यो धूमवान् सोऽग्निमानिति॰ साध्यनिषेधे साधननिषेधरूपेण प्रवृत्ता व्याप्तिर्व्यतिरेकव्याप्तिः॥ यथा योऽनग्निः स

एको व्याप्तिग्राहकप्रमाणाभावादपरस्तु उपाधिसंभावात् ॥ प्रथमो यथा यत् सत् तत् क्षणिकमिति क्षणिकत्वे सत्त्वं यो व्याप्तिग्राहकं प्रामाण्यासिद्धः ॥
द्वितीयो यथा अग्नीषोमीया हिंसा अधर्मसाधिका हिंसात्वात् । क्रतुबाह्यहिंसावत् ॥ इत्यत्र निषिद्धत्वमुपाधिः ॥ अतो हिंसात्वं हेतुः सो
पाधिकः ॥ साध्यविपरीतव्याप्तो हेतुर्विरुद्धः । तद्यथा नित्यः प्रकृतिः । कृतकत्वात्कालवत् ॥ कृतकत्वं हेतुः साध्याभावव्याप्तः ॥ साध्याव्या
प्तो हेतुर्विरुद्धः ॥ सव्यभिचारो नैकान्तिकः स च द्विविधः ॥ साधारणोऽसाधारणश्चेति ॥ पक्षसपक्षविपक्षवृत्तिः साधारणः ॥ यथा शब्दो
नित्यः प्रमेयत्वात् कालवत् ॥ असाधारणस्तु विपक्षसपक्षव्यावृत्तः ॥ यथा भूर्नित्या गंधवत्वात् इति ॥ प्रकरणसमस्तु साध्यविपरीत
साधकहेत्वन्तरवान् ॥ यथा ईश्वरोऽनित्यः ॥ नित्यधर्मरहितत्वात् ॥ ईश्वरो नित्यः अनित्यधर्मरहितत्वादिति ॥ अयमेव सत्प्रतिपक्षः ॥
5 कालात्ययापदिष्टो यथा यस्य हेतोः ॥ साध्याभाववान् पक्षः ॥ स कालात्ययापदिष्टः ॥ यथाग्निरनुष्णः पदार्थत्वात् ॥ जलवत् ॥ अयं प्रत्यक्षे
णोष्णत्वावधारणाद्बाधितः ॥ एवमनुमाने निरूपिते उपमानादेरनुमानादावन्तर्भावः ॥ यथा अतिदेशवाक्यार्थस्मरणसहकृते
गोसादृश्यविशिष्टपिंडज्ञानमुपमानम् ॥ गवयमजानन्नपि यथा गौस्तथा गवय इति ॥ कुतश्चिदारण्यकवाक्याच्छ्रुत्वा वनं गतो वा
क्यार्थं स्मरन् यदा गोसादृश्यविशिष्टपिंडं पश्यति तदा तद्वाक्यार्थस्मरणसहकृतगोसादृश्यपिंडज्ञानं जायते तदुपमानमित्युच्यते ।
स्मरणरूपत्वात् तस्य प्रत्यक्षेऽन्तर्भावः ॥ व्याप्तिग्रहणापेक्षत्वादनुमानेऽन्तर्भावः ॥ वाक्यजन्यत्वाच्छब्दे वा अन्तर्भावः ॥ अर्था
पत्तिर्नाम दिवा अभुंजानस्य पुरुषस्य पीनत्वदर्शनात् ॥ रात्रौ भोजनं कल्प्यते ॥ एतस्यानुमानेऽन्तर्भावः ॥ तर्को नाम व्याप्यांगीका
रेण व्यापकप्रसंजनम् ॥ तद्यथा पर्वतो वह्निमान् धूमवत्वादित्यनुमाने धूमोऽस्तु वह्निर्मास्तु इत्युक्ते यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति ।
एतस्य प्रमाणानुग्राहकत्वम् ॥ तर्कानुगृहीतप्रमाणपूर्वकत्वावधारणं निश्चयः ॥ वीतरागकथा वादः ॥ पक्षद्वयसाधनवती विजिगी

संयुक्ताम· तत्र पक्षवचनं प्रतिज्ञा यथा पर्वतोग्निमानिति लिंगस्य वचनं
हेतुः। यथा धूमवत्वादिति व्याप्तिनिर्देशपूर्वकं दृष्टान्तवचनं। गुरुः २

अतः केवलव्यतिरेकिनिरासः। केवलान्वयिना· अन्वयव्यतिरेकिणा च अत्यंतातीन्द्रियार्थगोचरा निरस्ता॥ तदेतदनुमानं स्वा
र्थं परार्थं चेति· द्विधा विभज्य केचिदाहुः॥ सर्वेषामनुमानानां स्वप्रतिसंधाने नाविलंबेन प्रवृत्ततया स्वव्यवहारमात्रहेतुत्वमिति
स्वार्थानुमानमेवेत्यपरे॥ तदनुमानं बोधकवाक्यं प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपपंचावयवमुदाहरणम्॥ यथा यो यो
धूमवान् स सोऽग्निमानिति॥ यथा महानस इति दृष्टान्तनिर्देशेन व्याप्ततया पक्षे हेतूपसंहारवाक्यमुपनयः॥ सोपि द्विवि
धः॥ अन्वयव्यतिरेकीभेदात्· यथा धूमवांश्चायमित्यन्वयोपनयः॥ अयं च न तथा निर्धूम इति व्यतिरेकोपनयः॥ हेतुपूर्वकं पक्षसा
ध्योपसंहारवाक्यं निगमनम्॥ अयमपि द्विविधस्तथैव॥ यथा तस्मादग्निमानित्यन्वयेन निगमनम्॥ तस्मादयं निरग्निर्न भव
तीति व्यतिरेकेण॥ एवं पंचावयववादिनो नैयायिकाः॥ प्रतिज्ञाहेतूदाहरणरूपअवयवत्रयवादिनो मीमांसकाः॥ उदाहरणोप
नयरूपावयवद्वयवादिनः सौगताः॥ अस्माकं त्वनियमः। केचित्पंचावयवः। केचिद्द्व्यवयवः केचित्त्र्यवयवः॥ उदाहरणो
पनयाभ्यामेव व्याप्तिपक्षधर्मतयोः सिद्धत्वात्॥ तावतैव अनुमित्युपपत्तेश्च॥ मृदुमध्यमकठोरधियां विस्तरसंग्रहाभ्यां
व्यवहारउपपद्यते॥ इत्यनियम एव· एवं पंचावयवसंयुक्तसद्धेतुरेव वह्न्यनुमापकः। सद्धेतुरित्युक्तत्वात्· धूमसदृशा धूलिपटला
न्न वह्न्यनुमितिः। अन्ये हेतुवदाभासमाना हेत्वाभासाः॥ ते चासिद्धविरुद्धअनैकांतिकप्रकरणसमकालात्ययापदिष्टभेदेन पञ्चप्रका
राः॥ तत्रासिद्धस्त्रिविधः। स्वरूपासिद्धः। आश्रयासिद्धः। व्याप्यत्वासिद्धश्चेति। स्वरूपासिद्धो यथा। अनित्यो जीवश्चाक्षुषत्वात् घटादि
वदिति॥ आश्रयासिद्धस्तु॥ व्योमारविंदं सुरभि अरविंदत्वात्सरोजारविंदवत्· व्योमारविंदमाश्रयः स चासिद्धः॥ व्याप्यत्वासिद्धो द्विविधः॥

6

प्रकाशनपरम्॥ अतः कृत्स्नस्य वेदस्य प्रामाण्यम्॥ स वेदः कर्मब्रह्मप्रतिपादकपूर्वोत्तरभागाभ्यां द्विधा भिन्नः॥ आराधनकर्म
प्रतिपादकं पूर्वकांडम्॥ आराध्यप्रतिपादकमुत्तरकांडम्॥ उभयोर्मीमांसकयोरैकशास्त्र्यम्॥ भाग[illegible]द्वयात्मको वेदः॥ ऋग्य
जुःसामाथर्वणरूपेण चतुर्धावस्थितः॥ पुनरनन्तप्रकारश्च॥ ऋगादिर्बहुप्रकारवान्वेदः॥ मंत्रार्थवादविधिरूपेण त्रिविधः।
अनुष्ठेयार्थप्रकाशको मन्त्रः॥ विध्यधीनप्रवृत्त्युत्तंभकवाक्यविशेषो अर्थवादः। हितानुशासनवाक्यमिह विधिः। स च त्रिविधः।
अपूर्वविधिपरिसंख्यानियमभेदात्॥ ते पुनर्नित्यनैमित्तककाम्यादिभेदाद्बहुविधाः॥ व्रीहीन्प्रोक्षतीति अपूर्वविधिः॥ मनोमय
त्वाद्युपासनविधिः विशिष्टविधिः॥ इमामगृभ्णन्नित्यश्वरसनाविधिः॥ परिसंख्याविधिः॥ गुर्वभिगमनादिविधिर्नियमवि
धिः। संध्योपासनादिर्नित्यविधिः॥ जातेष्ट्यादिविधिर्नैमित्तकविधिः ज्योतिष्टोमादिविधिः काम्यविधिः॥ एवं विध्यर्थवाद
मंत्रात्मकस्य वेदस्य छंदःकल्पनशिक्षानिरुक्तज्योतिषव्याकरणानि षडेतान्यंगानि छंदः अनुष्टुप्त्रिष्टुबादिप्रतिपादनरूपः श्रौतस्मार्त्तप्र
तिपादनपरः कल्पः॥ शिक्षा वर्णात्मिका॥ निरुक्तं निर्वचनपूर्वार्थप्रतिपादकम्॥ ज्योतिषं अध्ययनतदर्थानुष्ठानकालनिर्णायकं। व्याकरणं तु श
ब्दसाधुत्वादिसमर्थनपरम्॥ एवं सांगस्य वेदस्य प्रामाण्यं सिद्धम्॥ अथ श्रुत्यविरोधेनाचारव्यवहारप्रायश्चित्तादिप्रतिपादिका आप्तप्रणीता स्मृतिः प्रमा
णं। हिरण्यगर्भादीनामाप्तत्वेपि तेषां गुणत्रयवश्यसंभवात् तर्ककर्कयोगकपिलादिस्मृतीनां मन्वादिस्मृत्यविरुद्धांश एव प्रामाण्यम्॥ तत्त्वविपर्या
साद्विरुद्धांशो अप्रमाणो वेदोपबृंहणरूपेतिहासपुराणयोरपि प्रामाण्यं स्वतःसिद्धम्॥ तत्र भारतरामायणयोः क्वचित्क्वचिद्विरोधभानेपि तत्त्वार्थवे
दान्तवाक्यवदविरोधो नेयः॥ सर्गादिपंचकप्रतिपादकपुराणेष्वपि सात्त्विकराजसतामसभेदभिन्नेषु तत्त्वाविरोधाभावात्। विरुद्धांशो अप्रामाण्यम्

षुकथा जल्पः॥ स्वपक्षस्थापनाहीना तु वितण्डा। अविवक्षितशब्दार्थारोपेण दूषणं छलम्॥ स्वव्याघातकदूषणं जातिः॥ असदुत्तरं जातिर्वा।
पराजयहेतुर्निग्रहस्थानम्॥ इत्येषामनुमानाङ्गत्वादनुमानेऽन्तर्भावः॥ कश्चित्कश्चिन्नैयायिकमतानुसारी व्यवहारस्तु तन्मतानु
सारेणोक्तमिति न विरोधः॥ इत्यनुमानं निरूपितम्॥ इति श्रीवाधूलकुलतिलकश्रीमन्महाचार्यस्य प्रथमदासेन श्रीनिवास
दासेन विरचितायां यतीन्द्रमतदीपिकायामनुमाननिरूपणं नाम द्वितीयोऽवतारः॥२॥ अनुमाननिरूपणानन्तरं शब्दो निरूप्यते।
अनाप्तानुक्तवाक्यजनितं तदर्थविज्ञानं शाब्दज्ञानम्॥ तत्करणं शब्दः प्रमाणम्॥ अनाप्तानुक्तमित्युक्तत्वात् वेदस्यापौरुषेयत्वमतनि
रासः॥ करणदोषबाधकप्रत्ययाभाववद्वाक्यं वा॥ सर्गादौ भगवान् चतुर्मुखाय पूर्वक्रमविशिष्टान् वेदान् स्मृत्वा उपदिशतीत्यु
क्तेर्वेदस्यानित्यत्वमपौरुषेयत्वं चासिद्धमिति करणदोषाभावो बाधकप्रत्ययाभावश्च॥ ननु वेदवाक्यानां मीमांसकैः कार्यपरत
यैव प्रामाण्यस्वीकारात् सिद्धब्रह्मपरवाक्यानामसम्भवाच्च कथं प्रामाण्यमिति चेन्न सिद्धब्रह्मपरवाक्यानामपि उपासनारूपका
र्यान्वयस्वीकारात्। पितास्ते सुखमास्ते इति लौकिकसिद्धपरवाक्यस्यापि बोधकत्वदर्शनात् बालानां लोके मातृपितृप्रभृतिभिः॥ अं
बा तात मातुल चन्द्रादि वस्तु अङ्गुल्या निर्दिश्य तदभिधायिनः शब्दान् प्रयुज्यमानैः क्रमेण भूयः शिक्षितानां तत्तदर्थबुद्ध्युत्पत्तिदर्शनात्। वेदे
पि परिनिष्पन्नेऽप्यर्थे शब्दस्य बोधकत्वं सम्भवतीति नाप्रामाण्यशङ्कावकाशः। तर्हि आभिचारादिप्रतिपादकवेदांशस्य कथं प्रामाण्य
मिति न शङ्कनीयं तस्य दृष्टफलदर्शनेन अदृष्टस्वर्गादिफलसाधनादौ प्रतिपत्तिप्रयोजकत्वात्॥ पूर्वादिस्यवाक्यं तु आदिसर्वज्ञ

चार्य्यस्य प्रथमदासेन श्रीनिवासदासेन विरचितायां यतीन्द्रमतदीपिकायां शब्दनिरूपणं नाम तृतीयोऽवतारः ।। ३ ।। प्रमाणनिरूपणानन्तरं प्र
मेयं निरूप्यते ।। प्रकर्षेण मेयं प्रमेयं ।। तच्च द्विविधम् ।। द्रव्याद्रव्यभेदात् ।। द्रव्यमुपादानम् ।। अवस्थाश्रयमुपादानम् ।। ननु द्रव्यगुण
कर्मसामान्यविशेषसमवायाभावाख्याः सप्त पदार्थाः इति मन्वानान्तरस्थितेः षोढा गणनात् कथं द्रव्याद्रव्यभेदेन ।। द्वेधासमर्थनमिति
चेदुच्यते ।। उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात् ।। कर्म पंचधावस्थितमिति कल्पने गौरवात् ।। चलनात्मकं कर्म एकमे
वोपपत्तेः ।। तस्यापि संयोगमादायैवोपपत्तेः संस्थानमेव जातिरिति संस्थानातिरेकिसामान्यानंगीकारात् ।। समवायस्य समवायान्तरां
7 गीकारे अनवस्थानात् ।। तस्यापि संयुक्तविशेषणतयैवोपपन्नेः जीवेश्वरयोरणुत्वविभुत्वादिविभाजकधर्ममन्तरेण विशेष इति
किंचित्पदार्थान्तरांगीकारे गौरवात् ।। अतः कर्मसामान्यविशेषसमवायानां पृथक् द्रव्यत्वेनानंगीकाराच्च ।। द्रव्यमद्रव्यमिति द्विधा विभा
ग उपपद्यते ।। एतेन अभावः सप्तमपदार्थ इत्यपि निरस्तम् ।। अभावस्य भावान्तररूपत्वात् ।। प्रागभावो नाम पूर्वावस्थापरं परा॰ अत्यन्ता
न्योन्याभावौ तु धर्मान्तरस्वरूपावेव एतस्य प्रत्यक्षेन्तर्भावः ।। पूर्वमुक्तः ।। उपादानं द्रव्यमित्युक्तम् ।। गुणाश्रयो द्रव्यमिति सामान्यलक्षणं संभव
ति ।। तानि च द्रव्याणि षट् ।। प्रकृतिकालशुद्धसत्वधर्मभूतज्ञानजीवेश्वरभेदात् ।। तत्र जडाजडरूपयोः विभक्तयोः मध्ये जडलक्षणमुच्यते॰
अमिश्रसत्वरहितं जडमिति तद्द्विविधम् ।। प्रकृतिकालभेदात् ।। तत्र सत्वरजस्तमोरूपगुणाश्रया प्रकृतिः ; सा नित्या अक्षरा अविद्या
मायाशब्दवाच्या च ।। तस्यां भगवत्संकल्पाधीनगुणवैषम्यात् ।। कार्योन्मुखावस्था अव्यक्तशब्देनोच्यते ।। तस्मान्महानुत्पद्यते॰ सम
हान् सात्विकराजसतामसभेदात् त्रिधावस्थितः ।। महतो अहंकार उत्पद्यते ।। सोपि सात्विकाहंकार राजसाहंकारस्तामसाहंकारश्चेति

न्यः सर्वं प्रामाण्यम्॥ पाशुपतागमस्यापि तथैव॥ आगमादिप्रतन्त्रोक्तरसिद्धान्तभेदभिन्नस्य श्रीपञ्चरात्रागमस्य क्वचिदपि वेदविरोधाभावात्कार्त्स्न्ये
न प्रामाण्यम्॥ एवं वैखानसागमस्यापि धर्मशास्त्राणामपि तथैव॥ शाण्डिल्यपराशरभरद्वाजवसिष्ठहारीतादयो धर्मशास्त्रप्रणे
तारः॥ शिल्पायुर्वेदगान्धर्वभरतादिकमप्युपयुक्तांशे तथैव॥ शिल्पो नाम कर्षणादिगोपुरप्रकारादिप्रतिपादकः॥ आयुर्वेदो वैद्यम्।
गान्धर्वं गानादिनिरूपकः। भरतागमो नाट्यादिविधायकः पुनश्चतुःषष्टिकलारूपेषु शास्त्रेषु तत्तोपायपुरुषार्थोपयुक्तानि प्रमा
णानि कुलाभरणादिसूरिसूक्तयः॥ कार्त्स्न्येन प्रमाणतमाः॥ श्रीमद्रामानुजाचार्यप्रभृतिभिः प्रणीताः श्रीभाष्यादिप्रबन्धाः प्रमाणतमाः।
पुरुषस्वातन्त्र्याधीनरचनाविशेषविशिष्टं पौरुषेयम्॥ एतेन काव्यनाटकालंकारादीनामपि लक्षणमुक्तं स्यात्॥ एवमाकाङ्क्षायोग्यतासन्निधि
मल्लौकिकवाक्यान्यपि प्रमाणानि॥ यथा नद्यास्तीरे पञ्च फलानि सन्तीत्यादीनि॥ एवं वैदिकलौकिकसाधारणं द्विविधं मुख्यवृत्तिगौणवृत्तिभेदात्।
मुख्यवृत्तिरभिधावृत्तिः॥ यथा सिंहशब्दस्य मृगेन्द्रे सामिधावृत्तिः॥ योगरूढ्यादिभेदवशाद्बहुविधा॥ मुख्यार्थबाधे सति तत्सम्बन्धे वृत्तिरौ
पचारिका॥ सा द्विविधा लक्षणा गौणीभेदात्। प्रथमा यथा गङ्गायां घोष इत्यत्राधिकरणस्य बाधात्तीरे लक्षणा। द्वितीया यथा सिंहो देवदत्त
इत्यत्र देवदत्ते शौर्यादिगुणयोगः॥ एवं वैदिकलौकिकरूपं सर्ववाक्यजातं सविशेषविषयकं न निर्विषयकं च। शरीरवाचकशब्दानां यथा शरीरि
णि पर्यवसानम्॥ एवं भगवच्छरीरभूतप्रसिद्धेन्द्रदासीनृपादिचिद्वाचकशब्दानां तथा शरीरभूतप्रकृतिकालाकाशप्राणाद्यचिद्वाचकशब्दा
नां शरीरेऽस्मिन्परमात्मनि नारायणे पर्यवसानमुपपादयन्त्याचार्याः वेदान्तज्ञानाद्युत्पत्तिपूर्वकं तत्सूक्तम्॥ नारायणस्य सर्वशब्दवाच्य
त्वम्॥ सर्वशरीरकत्वमित्यादिकं तु उपरि ईश्वरनिरूपणे प्रतिपादयिष्यामः॥ इति शब्दो निरूपितः॥ इति श्रीवाधूलकुलतिलक श्रीमन्मह

रगमनादिमुक्तजीवेन सहगमनमिन्द्रियाणां मुक्तिदशायां अप्राकृतदेशगमनात्संभवादिहैव यावन्मूलप्रक्षिप्तिः ।। करणविकरैरंशैःपरि
ग्रहो वा ।। कर्मेन्द्रियाणां शरीरनाशान्नाश इति पक्षस्तु भाष्यविरोधेन नेयः ।। एतेन पुरुषेन्द्रियं स्त्रीन्द्रियं एकेन्द्रियं वा धित्वा त्वगिन्द्रिये
कस्वीकार इत्यादिविमतपक्षा निरस्ताः ।। राजसाहंकारसहकृतान्भूतादिसंज्ञकतामसाहंकाराच्छब्दादिपंचतन्मात्राणि ।।
आकाशादिपञ्चमहाभूतानि चोत्पद्यन्ते ।। भूतानामव्यवहितसूक्ष्मावस्थाविशिष्टं द्रव्यं शब्दतन्मात्रम् ।। तदेव भूतोपादानम् ।। विशि
ष्टशब्दादिविषयाधिकरणभूतम् ।। तन्मात्राणि शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रम् रसतन्मात्रं गन्धतन्मात्रमिति पंचभूतानि
8 तथा आकाशवायुतेजअपःपृथिवीभेदात् ।। तत्र तामसाहंकाराकाशयोर्मध्यमावस्थाविशिष्टं द्रव्यं शब्दतन्मात्रम् ।। क्षीरदध्यो
रंतरालपरिणामवत्तस्मादाकाशो जायते ।। अस्पर्शत्वे सति विशिष्ट[illegible]रूपाननुगत[illegible]शब्दाधारत्वं श्रोत्रग्राह्यत्वं
च आकाशलक्षणं स च प्रत्यक्षः शब्दमात्रगुणकः ।। अवकाशहेतुः । नीलं नभ इति प्रतीतेः रूपवांश्च एतेनाकाशस्य अजन्यत्वनि
रासः ।। सूर्यपरिस्पंदादिभिराकाशस्यैव प्राच्यादिव्यवहारोपपत्तेः दिगिति न पृथक् द्रव्यकल्पनम् ।। दिक्सृष्टिस्तु अन्तरिक्षादिसृष्टि
वदुपपद्यते ।। आकाशात्स्पर्शतन्मात्रम् ।। आकाशवाय्वोर्मध्यमावस्थाविशिष्टं द्रव्यं स्पर्शतन्मात्रम् ।। तस्माद्वायुः ।। विशिष्टस्पर्शत्वे
सति रूपशून्यत्वम् ।। अस्मदादिस्पर्शनैकेंद्रियग्राह्यद्रव्यत्वम् ।। अनुष्णाशीतविशिष्टस्पर्शवत्त्वे सति गंधशून्यत्वमित्यादिकं वायोर्लक्ष
णम् ।। तस्मिन्नानासलिलातपकुसुमाद्यवयवयोगात् ।। शितोष्णसौरभादिप्रतीतिः ।। स च त्वगिन्द्रियाप्यायकत्वेन उपकरोति ।
तस्य शब्दस्पर्शौ गुणौ तत्र शरीरधारणादिहेतुर्वायुविशेषः प्राणः सोऽनेकः । पंचप्रकारः । प्राणापानव्यानोदानसमानभेदात् ।। हृदि प्राणो गु

त्रिविधो मतः ॥ एतेषां त्रयाणां वैकारिकस्तैजसो भूतादिरिति नामान्तराण्यपि संभवन्ति ॥ तेषु वैकारिकऽतिसात्त्विकाद्राजसाहंकारसहकृता
त्सात्त्विकाहंकारादेकादशेन्द्रियाणि जायन्ते ॥ सात्त्विकाहंकारोपादानकं द्वयमिन्द्रियम् ॥ इन्द्रियं द्विविधम् ॥ ज्ञानेन्द्रियं कर्मेन्द्रियं चेति ॥ ज्ञान
प्रसारणसाधकमिन्द्रियं ज्ञानेन्द्रियं तत्षोढा मतः ॥ श्रोत्रचक्षुर्घ्राणरसनत्वग्मनोभेदात् ॥ स्मृत्यादिकरणमिन्द्रियं मनः ॥ तच्च हृदयप्रदेशवर्ति ॥
बुद्ध्यहंकारचित्तादिशब्दवाच्यम् ॥ बन्धमोक्षहेतुभूतं च ॥ शब्दादिं च केशब्दमात्रग्रहणसाधकमिन्द्रियं श्रोत्रम् ॥ तच्च मनुष्यादीनां कर
र्णशष्कुल्यवच्छिन्नप्रदेशवर्ति ॥ द्विजिह्वानां नयनवर्ति ॥ एवं रूपमात्रग्रहणसाधकमिन्द्रियं रसनेन्द्रियं चक्षुः ॥ तत्सर्वेषां नयन
वर्ति ॥ गन्धमात्रग्रहणसाधकमिन्द्रियं घ्राणं नासाग्रवर्ति ॥ रसमात्रग्रहणसाधकमिन्द्रियं रसनेन्द्रियं जिह्वाग्रवर्ति ॥ स्पर्शमात्रग्रह
णसाधकमिन्द्रियं त्वगिन्द्रियम् ॥ सर्वशरीरवर्ति नखदन्तकेशादिषु प्राणमांसाभावात् तत्स्यात् ॥ स्पर्शानुपलंभः ॥ श्रोत्रादीन्द्रियाणां भौ
तिकत्वप्रतिपादनं भूताध्यायतत्त्वे मोक्षधार्मिकम् ॥ एतेषां विषयसंबन्धः केचित्संयोगः ॥ केचित्संयोगः ॥ केचित्संयुक्ताश्रयणमिति व
वद्धसंप्रत्ययः ॥ उच्चारणादिपञ्चान्यतमक्रियासाधकत्वं कर्मेन्द्रियसामान्यलक्षणम् ॥ तच्च वाक्पाणिपादपायूपस्थभेदात्पंचधाव
स्थितम् ॥ वर्णोच्चारणकारणमिन्द्रियं वाक् ॥ तच्च हृत्कण्ठजिह्वामूलतालुदन्तोष्ठनासामूर्ध्निरूपस्थानाष्टकवर्ति ॥ मृगादि
षु अदृष्टविरहात्तदभावः ॥ शिल्पादिकरणमिन्द्रियं पाणिः ॥ स च मनुष्यादीनामंगुल्यादिवर्ति ॥ वारणादीनां नासाग्रवर्ति ॥ संचरणा
दिकरणमिन्द्रियं पादः ॥ स च मनुष्यादीनां चरणवर्ति ॥ भुजंगपतंगादीनामुरःपक्षवर्ति ॥ मलादित्यागकरणमिन्द्रियं पायुः ॥
स च तत्तदवयववर्ति ॥ आनन्दविशेषकरणमिन्द्रियं उपस्थः ॥ स च मेहनादिवर्ति ॥ एतानीन्द्रियाण्यणूनि ॥ परकायप्रवेशे लोकान्त

कृत्वा द्वयोर्भागयोः ॥ स्वभागमेकं निधाय भागान्तरं चतुर्धा कृत्वा तान् चतुर्भागान् भूतान्तरेषु चतुर्षु योजयति एवं सर्वेषु क्रियमाणेषु । एकैकस्य भूतस्य
द्व्यात्मकं स्वाभाविकं । अर्द्धान्तरं चतुर्णां भूतानां भागसमुदाय इति भवति । यथा च स्वभागस्य भूयस्त्वात् परभागस्याल्पीयस्त्वात् पृथिव्यादिव्यपदेशः ।
देहेन्द्रियकरणोपदेशस्तु पंचीकरणस्याप्युपलक्षणम् । भूतैः सार्द्धं महदहंकारौ मिलित्वा सप्तीकरणमित्याहुः ॥ एते तु चतुर्विंशति संख्या
केषु पंचभूतानि प्रकृतिमहदहंकाराश्च शरीरोपादानानि ॥ एकादशेन्द्रियाणि प्रत्येकमसंख्यातानि प्रतिग्रहणाभिमतानि आभरणानि
नरत्नानीव शरीरमात्रव्यतिरिक्तानि ॥ शरीरं नाम चेतनं प्रति आधेयत्वविधेयत्वशेषत्वनियमैरपृथक्सिद्धो द्रव्यविशेषः ॥ इदमेकल
क्षणम् ॥ नियमेन यदाधेयं नियमेन यद्विधेयं नियमेन यच्छेषमिति लक्षणत्रयं वा योज्यम् ॥ ईश्वर ज्ञानव्यतिरिक्तं व्यशरीरमि
९ तितदस्य लक्षणम् । एतेन चेष्टाश्रयः शरीरं [illegible]रिन्द्रियाश्रयः शरीरम् । भोगायतनं शिरः पाणिपादादिमच्छरीरमित्यादी
नि परोक्तानि शरीरलक्षणानि निरस्तानि ॥ शरीरं द्विविधम् । नित्यमनित्यमिति । तत्र नित्यं त्रिगुणद्रव्यकालजीवशुभाश्रयादिकं ईश्वर
शरीरम् नित्यसूरीणां च स्वाभाविकं गरुडभुजंगादिरूपम् ॥ अनित्यं द्विविधम् ॥ अकर्मकृतं कर्मकृतं चेति । प्रथममीश्वरस्य म
हदादिरूपं तथा अनन्तगरुडादीनां च इच्छागृहीतं तत्तद्रूपम् ॥ कर्मकृतमपि द्विविधम् ॥ स्वसंकल्पकृतं कर्मकृतं केवलकर्मकृतं चेति ॥ पूर्वं
महतां सौभरिप्रभृतीनां । उत्तरं चान्येषां । पुनः सामान्यतो द्विविधम् ॥ स्थावरजंगमभेदात् ॥ शिलावृक्षगुल्मलतादयः ॥ जंगमश्चतुर्धा देवमनुष्यति
र्यक्स्थावरभेदात् ॥ उद्भिज्जस्वेदजजरायुजाण्डजादिभेदा अविविभागज धर्माः ॥ अयोनिजधर्मी अयोनिजशरीरा अपि सन्ति ॥ एवं पंचीकृता
नामेवाण्डोत्पादकत्वम् ॥ अण्डोत्पादनात् सूक्ष्मसृष्टिः समष्टिसृष्टिः अनन्तरं स्थूलसृष्टिः व्यष्टिसृष्टिः ॥ महदादीनामुत्पत्तिर्नाम नालीयपानादैक
भावेन अवस्थान्तरापत्तिरेव । सेनावनराश्यादिव्यवहारवत् । पूर्वापरावस्थाविशेषसंबन्धमात्रेण कार्यकारणभेदव्यवहारः ॥ तत्र

दे ऽपानः सर्वशरीरगो व्यानः। कंठे उदानः। नाभिदेशे समान इति जंगमेष्विव स्थावरेषु च प्राणसंबंधस्तुल्य एव। स च स्पर्शेन प्रत्यक्षः॥ एतेन अनुमेयवादनिरा-
सः। वायुतेजसोर्मध्यमावस्थाविशिष्टं द्रव्यं रूपतन्मात्रं तस्मात्तेजः। उष्णस्पर्शवत्त्वं भास्वररूपवत्त्वादिकं तु तेजसो लक्षणम्॥ तस्य
वृद्धिः पचनादिहेतुमग्निरूपात्मना। अन्तः वैश्वानरसंज्ञकजाठराग्निरूपेण। दिव्यभौमादि अतिरिक्तानां चाक्षुषज्ञाने आलोकादि-
रूपेण सहकारी भवति॥ तच्चतुर्विधं भौमदिव्यौदर्याकरजभेदात्॥ तत्र पार्थिवमात्रेंधनं तेजो भौमं तद्दीपादि। जलमात्रेंधनं दिव्यं सूर्या-
दि॥ पार्थिवजलेन्धनमौदर्यं तज्जाठरम्॥ निरिंधनं तेजः आकरजं सुवर्णादि। सुवर्णस्य द्रव्यान्तरसंसर्गादुष्णस्पर्शाभावः॥ पुनः सामा-
न्येन प्रभा प्रभावांश्चेति विभक्तम्॥ आवरणासद्भावाधीनसंकोचविकाशप्रभावित तेजोविशेषः प्रभा॥ सा च प्रभा वह्निस्सहेतस ह्रतेसह-
न्यपतिः द्रव्यरूपा गुणाभूता सावयवा च। अनेन प्रभायाः केवलगुणत्वमतनिरासः॥ प्रभाविशिष्टं तेजः प्रभावच्च चतुर्विधमिति प्रतिपादितं ते-
जः॥ उष्णस्पर्शरूपगुणवच्च॥ तेजः॥ सलिलतेजसोर्मध्यमावस्थाविशिष्टं द्रव्यं रसतन्मात्रम्॥ तस्मादापः॥ शीतस्पर्शवत्त्वं निर्गन्धत्वे सति विशिष्ट-
रसवत्त्वं रसादि अपां लक्षणम्। तासां शुक्लमधुरशीतैकस्वभावानामाश्रयादिसंसर्गभेदात्॥ रूपरसस्पर्शवैचित्र्यारोपः। ताः समुद्रसरि-
न्नदादिरूपेण बहुप्रकाराः॥ शब्दस्पर्शरूपरसगंधात्मके चतुःपिंडीकरणादिहेतवः॥ अप्पृथिव्योर्मध्यमावस्थाविशिष्टं द्रव्यं गंधतन्मात्रं तस्मा-
त्पृथिवी॥ विशिष्टगंधवत्त्वं रसवत्त्वे सति विशिष्टस्पर्शवत्त्वमित्यादि पृथिवीलक्षणम्॥ सा सुरभिर्मधुरा कृष्णादिरूपा च॥ अनुष्णाशीतस्पर्शवती
क३ पाकजभेदानुविचित्रवर्णा विचित्ररसा च। अस्याश्च मनो घ्राणव्यापकत्वेन षट्प्रकारकत्वम् पाषाणलोष्टधात्वादिबहुप्रकारवती शब्दस्पर्शरूप-
रसगंधगुणकारणहेतुश्च। तमसः पृथिव्यामंतर्भावः। तद्गुणत्वान्न द्रव्यान्तरत्वात्। अत एव आलोकाभावमात्रम्॥ द्रव्यान्तरवादिप-
क्षा निरस्ताः॥ एतेषु सर्वत्र पंचीकरणप्रक्रियया शब्दादीनां गुणानामुपलंभः॥ पंचीकरणप्रक्रियां तु भगवान्भूतानि स्वद्वारेकैकमेव भूतं द्विधा

तदुपरि ध्रुवः सूर्यमंडलमारभ्य ध्रुवलोकपर्य्यन्तस्त्वर्लोकः दशचतुर्लक्षादुपरि कोटियोजनोच्छ्रायो महर्लोकः ॥ तस्माद्द्विगुणे जन
लोकः ॥ ततश्चतुर्गुणे तपोलोकः ॥ तस्माद्दशकोटियोजनसत्यलोकः ॥ ततस्तमः गर्भी दर्कअंडकटाहश्च ॥ एवं तिर्य्यगूर्द्ध
प्रमाणेन पंचाशत्कोटियोजनत्वं भूमेरुक्तं भवति ॥ एवं शतकोटियोजनविस्तीर्णवादोमानभेदेन अंडकटाहस्तु कोटियोज
नोच्छ्रायः ॥ तदण्डं दशगुणेनावरणाच्छन्नम् ॥ एतादृशानि अंडानि अनन्तानि जलबुद्बुदवत् युगपदीश्वरस्थानि ॥ ईश्वरस्य
चतुर्मुखपर्य्यन्तास्सृष्टिरक्षारक्षान्तरनन्तरसंहारकेति विवेकः ॥ विस्तारस्तु पुराणेभ्यो द्रष्टव्यः ॥ इति प्रकृतिनिरूपिता ०:
10 इति श्रीवाधूलकुलतिलकश्रीमन्महाचार्य्यस्य प्रथमदासेन रूपापौत्रेण श्रीनिवासदासेन विरचितायां यतीन्द्रमतदीपिका
यां प्रकृतिनिरूपणं नाम चतुर्थोवतारः ॥ ४ ॥ ०: अथाचिद्विशेषः ॥ कालो निरूप्यते ॥ कालो नाम गुणत्रयरहितो जडविशेषः । सच
नित्यो विभुश्च ॥ भूतभविष्यद्वर्तमानभेदेन त्रिविधः ॥ युगपत्क्षिप्रचिरादिव्यवहारहेतुः ॥ निमेषकाष्ठातत्परादिसकलामुहू
र्तदिवसपक्षमासर्त्वयनवत्सरादिव्यपदेशहेतुश्च ॥ मनुष्यमानेन मासः पितॄणां दिनम् । तेषां अमावास्या मध्याह्नम् ॥ मनुष्य
मानेन वत्सरो देवानां दिनम् ॥ तेषामुत्तरायणमहः ॥ दक्षिणायनं रात्रिः ॥ एवं देवमानेन द्वादशवर्षसहस्रवर्षसंख्याकं चतुर्युग
मित्युच्यते ॥ तत्र चतुःसहस्रवर्षसंख्याकं कृतयुगं तत्र पूर्णो धर्मः ॥ त्रिसहस्रके त्रिपाद्धर्मवत् ॥ त्रेतायुगं द्विसहस्रवर्षपरिमितंसा
र्धधर्मवत् द्वापरं सहस्रवर्षसंख्याकं ॥ एकपादधर्मसंयुक्तं कलियुगम् ॥ एतेषां संधिरपि सहस्रसंख्याकः ॥ एवं चतुर्युगसहस्राणि ब्रह्मणो
दिवसमात्रप्रमाणकम् ॥ एवं रात्रिरपि ब्रह्मणो अह्नि चतुर्दशमनवो जायन्ते ॥ इन्द्रा अपि तथैव ॥ तथा सप्तऋषयश्च १ एकैकमनोरेकसप्तति

पूर्वावस्थाग्रहणेन विजातीयावस्थाप्राप्तौ तत्त्वान्तरमपदेशः पृथिवीपर्यंतमेव। इत्थं प्रकृतिमहदहंकारएकादशेन्द्रियतन्मात्रपंचकभूतपंचकवि
भागेन चतुर्विंशतितत्त्वानि वर्णितानि। एतेन न्यूनाधिकसंख्यातत्त्ववादिनो वादाः पास्ता यतोश्वानिरस्तापरमाणुकारणत्ववादिनोपि निरस्ताः
प्रकृत्यन्तरम्यः ईश्वरस्य जीवस्य च भोग्यभोगोपकरणभोगस्थानानि भवन्ति भोग्यं विषयाः॥ भोगोपकरणं चक्षुरादिकरणानि भोगस्था
नानि चतुर्दशभुवनांतरवर्त्तीनि अंडजानानि॥ ब्रह्मांडं नाम। कपित्थफलाकारं पंचीकृतपंचमहाभूतारब्धं प्राकृतं तद्गर्भः। तत्र पृथ्वी पद्मकाकारा भूः क
र्णिकाकारो मेरुः॥ मेरोर्दक्षिणेन किंपुरुषहरिवर्षाणि। उत्तरतो रम्यकहिरण्मयकुरुवर्षाणि त्रीणि। पुरतो भद्राश्ववर्षम्॥ पश्चात्केतुमा
लाख्यवर्षम्। मध्ये तु इलावृतम् एवं नववर्षयुक्तं जंबूद्वीपं लक्षयोजनविस्तीर्णं समपरिमाणेन लवणसमुद्रेणावृतम्। सिंधुः द्विगुणे
न सप्तवर्षात्मकेन प्लक्षद्वीपेन वेष्ठितः॥ सोपि इक्षुसमुद्रेण सोपि शाल्मलिद्वीपेन स पुनः॥ सुरासमुद्रेण सकुशद्वीपेन। स सर्पि
समुद्रेण सोपि क्रौंचद्वीपेन सदध्येन सोपि शाकद्वीपेन वेष्ठितः॥ सक्षीरार्णवेन। सवर्षद्वयविभाजकवलयाकारमानसो
त्तरपर्वतसहितेन पुष्करद्वीपेन मधुजलार्णवेन एवं द्वीपानामुत्तरोत्तरद्विगुण्यं द्रष्टव्यम्॥ लक्षद्वीपादि पंचसप्तवर्षात्मकाः सप्तद्वीपा
त्मकोयम्॥ द्विगुणीकृततया कांचनभूमयस्ततः॥ कांचनभूमिस्तु लोकालोकपर्वतेन॥ पर्वतस्तु वेष्ठितः तमसा। तदन्धतमोगर्भोदके
न। ततोंडकटाहः एवं भूमेरधः अतलवितलरसातलतलातलसुतलपातालभेदात्॥ सप्तलोका अधो नरकाः॥ ते च पापकर्म
णां पापानुभवभूमयः॥ रौरवाद्या मुख्यतया एकविंशतिप्रभेदाः॥ तानोगर्भोदके अनन्तरमंडकटाहः॥ एवं मेरुपरिलक्षयो
जनात् सूर्यमंडलं तदेव भुवर्लोकः॥ तदुपरि चंद्रमंडलम्॥ तस्मादुपरि नक्षत्रबुधशुक्रांगारकबृहस्पतिशनिसप्तर्षिमण्डलानि

११ रवदिति प्रमाणानुसारेण परिग्रहो द्रष्टव्यः॥ मुक्तानां शरीरपरिग्रहस्तु बसंतो स्वस्वे स्वपरिग्रहाः स्वस्वामिनः कैंकर्यमेव॥ ईश्वरशरीर
स्य षाड्गुण्यमिति व्यवहारः षाड्गुण्यप्रकाशकत्वात्। नित्यनिरवद्यनिरतिशयौज्ज्वल्यसौंदर्यसौगंध्यसौकुमार्यलावण्ययौवनमा
र्दवाद्यो दिव्यमंगलविग्रहगुणाः॥ तस्य व्यापकत्वम्· गीतादिषु प्रसिद्धम्॥ मुक्तस्य शरीरं नास्तीति वचनं तु कर्मकृतशरीराभावपरम्·
तत्र स्वेन्द्रियाणां नित्यत्वात्। अत एव कार्यकारणभावाभावात्॥ अतः शाक्तत्ववन्नतत्वान्तरव्यपदेशः एतेन तत्र शरीरेन्द्रियादिकं ना
स्तीति मतनिरासः॥ अप्राकृतशब्दस्पर्शरूपरसगंधाश्रयत्वात्॥ आकाशादिव्यावृत्तिः॥ ज्ञानात्मकत्वप्रतिपादनात् जडमिति मतनि
रासः। तमसः परस्तादित्युक्त्या प्राकृतैकदेशवादिमतनिरासः॥ भगवतः अप्राकृतदिव्यमंगलविग्रहस्तु॥ अस्त्रभूषणाध्यायोक्त
सर्वाश्रयः। तत्र यथा पुरुषस्य कौस्तुभाकारत्वम्॥ प्रकृतेः श्रीवत्सरूपत्वं महतो गदारूपत्वं सात्त्विकाहंकारस्य शंखत्वं तामसाहंकारस्य
शार्ङ्गत्वं ज्ञानस्य खड्गरूपत्वमज्ञानस्य तदावरकत्वं मनसश्चक्रत्वं ज्ञानेन्द्रियाणां शररूपत्वम्॥ सूक्ष्मस्थूलभूतानां वनमालित्वम्· चेतस्त्र
कृतिचेतनास्थिरमतिस्तत्वं तिमालिकाभूतानि स्वगुणैरहंकृति युगं शंखेन शार्ङ्गायते· बाणाः खानि दृशोपि कौस्तुभमणिर्जीवः प्रधानं पुनः
श्रीवत्सकमलायते स्तवगदामाहुर्महान्तं बुधाः॥ १॥ इति संग्रहोक्तं यद्यमनुसंधेयम्॥ सा विभूतिरामोदः प्रमोदः संमोदः वैकुंठाख्यरूपेण चतुर्वि
धा पुनरनन्ताश्च॥ त्रिपाद्विभूति परमपद परमव्योम परमाकाशामृतनाकाप्राकृतलोक आनन्दलोक वैकुण्ठायोध्यादिशब्दवाच्या॥ एतस्यां विभूतौ द
शावरणोपेतं अनेकगोपुरप्राकाररत्नं वैकुंठनाम नगरम्॥ तत्रानन्दनामदिव्यालये तदन्तः॥ रत्नमयानकस्तंभसह[illegible]
स्त्रैर्विरचितामहामणिमंडपाख्यासभा· तस्यां सहस्रफणामणितेजोविराजितोऽनन्तः॥ तस्मिन्धर्मादिमयदिव्यसिंहासनं तदुपरि चामरहस्तैर्विमला
दिभिः॥ सेवितमष्टदलात्मकं पद्मं तदुपरि षष्ठविज्ञानधाम शेषः तदुपरि वाचः परमद्भुतं एवं नित्यविभूतिनिरूपणं नाम षष्ठोऽवतारः॥ ६॥

चतुर्युगपरिकालः॥ एवं ब्रह्ममानेन प्रलयः॥ शतवर्षजीवितं एवं सर्वं कालाधीनम्॥ एवं नित्यनैमित्तिकप्राकृतप्रलया अपि कालाधीनाः॥
कालस्य स्वकार्य्यं प्रति स्वस्य उपादानत्वम्॥ अखण्डकालो नित्यः॥ कार्याः पुनरनित्याः एवंभूतः कालः ईश्वरस्य क्रीडापरिकरो भवति। लीला
धीनः॥ एवं कार्य्यं करोति नित्यविभूतौ तु कालस्य विद्यमानत्वेपि तस्य न स्वातंत्र्यम्॥ केचित्तु तत्र कालो नास्तीति वदन्ति॥ केचित्तु षडिन्द्रियवैधुःका
इत्यप्याहुः॥ तेन अनुमेयवादनिरासः॥ इति कालो निरूपितः॥ इति श्रीमन्महाचार्यस्य प्रथमदासेन श्रीनिवासदासेन विरचितायां यतीन्द्रम
तदीपिकायां कालनिरूपणं नाम पंचमोवतारः ॐ ५॥ अथ नित्यविभूतिर्निरूप्यते॥ शुद्धसत्वधर्मभूतज्ञानजीवेश्वरसाधारणलक्ष
णमजडत्वम्॥ अजडत्वं नाम स्वयंप्रकाशत्वम्॥ तत्र शुद्धसत्वधर्मभूतज्ञानसाधारणलक्षणं पराक्त्वे सत्यजडत्वम्॥ ननु स्वयंप्रकाशकत्वे सति पर
स्मादेवभासमानत्वं शुद्धसत्वत्वं नाम त्रिगुणद्रव्यभिन्नत्वे सति सत्ववत्वम्॥ निःशेषाविद्यानिवृत्तिदेशविजातीयान्यत्वम्॥ सा विभूति
रूर्ध्वप्रदेशे अनन्ता अधःप्रदेशपरिच्छिन्ना॰ अचेतनास्वयंप्रकाशा च॰ आनन्दवत्त्वादानन्दनामका॰ पंचोपनिषन्मंत्रप्रतिपा
द्यतया॥ पंचोपनिषदात्मिका॥ अप्राकृतपंचशक्तिमत्त्व पंचशक्तिमयेति निगद्यते॥ सा विभूतिरीश्वरस्य नित्यानां मुक्ता
नां च ईश्वरसंकल्पात्॥ भोग्यभोगोपकरणभोगस्थानरूपा भवति॥ भोग्यमीश्वरशरीरादिभोगोपकरणम्॥ चंदनकुसुम
वस्त्रभूषणायुधानि॥ मुक्तानां शरीराणि तेषामपि इच्छया युगपदनेकशरीरपरिग्रहाः स्युः। तानि भगवत्संकल्पादेव भवंति॰
भगवतो व्यूहविभवार्चावतारशरीराण्यपि अप्राकृतमयानि॥ अर्चावतारे तु प्रतिष्ठानंतर प्रसादेन तु ईश्वरसंकल्पा
धीनं अप्राकृतशरीरमात्रमाविर्भवति॥ प्राकृताप्राकृतसंसर्गः कथमिति न संकनीयम्॥ रामकृष्णादि अवतारशरी

१२ नुमानागमह्रीभीधीस्मृतिसंशयविपर्य्ययप्रमादविवेकव्यवसायमोहरागद्वेषमदक्षमामात्सर्य्यधैर्य्यचापलदंभलोभक्रोधदर्पस्तंभद्रोहाभिनि
वेशनिर्वेदानंददयः ॥ सुमतिर्दुर्मतिः सुप्रीतिः तुष्टिः उन्नतिः शान्तिः कान्तिः विरक्तिः रतिमैत्रीदयामुमुक्षालज्जातितिक्षाविचारणाजिगीषामु
दितासमाचिकिर्षाजुगुप्साभावनाकुलनाअसूयाजिघांसातृष्णादुराशावासनावंचनाश्रद्धाभक्तिः प्रपत्तिरित्येवमादयश्च जीवगुणाः
अनन्ताः धर्मभूतज्ञानावस्थाविशेषा एव ॥ एवं ज्ञानशक्तिबलैश्वर्य्यतेजःसौशील्यमार्दवमार्जवसौम्यकारुण्यमाधुर्य्यगांभीर्य्यौदार्य
स्थैर्य्यपराक्रमादयो भगवतोऽनन्तकल्याणगुणाः ॥ ज्ञानशक्त्यादिर्व्वितनिभक्ताः तत्र ज्ञानं नाम सर्वसाक्षात्काररूपम् ॥ शक्तिरघटि
तघटनासामर्थ्यं बलं धारणसामर्थ्यं ॥ ऐश्वर्य्यं नियमनसामर्थ्यं वीर्य्यमविकारित्वम् तेजः पराभिभवनसामर्थ्यम् ॥ महतो मंदैः सह नी
12 रंध्रेण संश्लेषस्वभावत्वं सौशील्यम् ॥ वात्सल्यं दोषेष्वपि गुणत्वबुद्धिर्दोषादर्शित्वं वा ॥ आश्रितविरहासहत्वं मार्द्दवम् ॥ मनोवाक्कायैकरू
प्यमार्जवम् ॥ स्वसत्तानपेक्षतदुःखापहरत्वं सौहार्दम् ॥ जन्मज्ञानवृत्तगुणाद्यनपेक्षया सर्वैराश्रयणीयत्वं सौम्यम् ॥ आश्रितदोषगोप
नेचातुर्य्यं ॥ अपेक्षनीयत्वं स्थैर्य्यं प्रभग्नप्रतिज्ञात्वे धैर्य्यं परबलप्रवेशनसामर्थ्यं शौर्य्यं ॥ तन्निरासकरणं पराक्रमः ॥ एवं वदाम्यहं सारादव
प्यूहम् ॥ ज्ञानविशेषभूतयोः भक्तिप्रपत्तिज्ञानयोः ॥ स्वरूपं किंचिदुच्यते ॥ भक्तिप्रपत्तिभ्यां प्रसन्न ईश्वर एव मोक्षं ददाति ॥ अतस्तयोरेव मो
क्षोपायत्वेनोक्तानां कर्मयोगज्ञानयोगप्रभृतीनां भक्तिद्वारैव साधनत्वम् ॥ कर्मयोगो नाम उपदेशाज्जीवपरयाथात्म्यज्ञानवता मशक्त्या
नुसारेण फलसंगरहितो निषिद्धकाम्यनित्यनैमित्तिकरूपपरिगृहीतकर्मविशेषः ॥ स तु देवार्चनतपस्तीर्थदानयज्ञादिभेदभिन्नः ॥
अयं तु जीवगतकल्मषापनयनद्वारा ज्ञानयोगमुसाद्य तद्द्वारा साक्षाद्वा भक्त्युत्पादको भवति ॥ ज्ञानयोगो नाम कर्मयोगान्निर्मलान्तःकरणस्येश्व
रशेषत्वेन प्रकृतिवियुक्तस्यात्मनश्चिंताविशेषः ॥ एतस्य साक्षाद्भक्त्युपयोगित्वम् ॥ एवं साधनान्तराणामपि भक्त्युपयोगित्वमुह्यम् ॥ भक्तियोगो ना
म यमासनप्राणायामप्रत्याहारध्यानधारणासमाधिरूपाष्टांगवान् तैलधारावदविच्छिन्नस्मृतिसंतानरूपः ॥ स च विवेकविमोकाभ्यासक्रिया

ज्ञाभावः। न च तत् ज्ञानस्य तिरोधायकतमोविशेषसन्निधानासंनिधानाभ्यां स्वोपाधिसिद्धिः। उत्पत्त्यादिकं उत्पत्त्यादिकं वाल्पेतिरो त्रुटिः ८

अथ क्रमप्राप्तं धर्मभूतज्ञानं निरूप्यते॥ स्वयंप्रकाशाचेतनद्रव्यत्वे सति विषयित्वं विभुत्वे सति प्रभावत् द्रव्यगुणात्मकत्वं अर्थप्रकाशो बुद्धिरिति तल्लक्षण
म्॥ तद्धर्मभूतज्ञानमीश्वरस्य नित्यानां च सर्वदा नित्यमेव विभु च। बद्धानां तिरोहितमेव मुक्तानां पूर्वं तिरोहितं अनन्तरमाविर्भूतं ज्ञानस्य नित्यत्वे
ज्ञानमुत्पन्नं ज्ञानं नष्टं कथमिति चेन्न। ज्ञानसंकोचविकाशावस्थामादाय तत्संभवादिति। प्रदीपो यथा उदकेक्षरति तथा ज्ञानमपि। इंद्रियद्वारा निःसृत्य
अर्थेन सन्निकृष्यते अहिकुण्डलवत् संकोचविकासौ॥ सर्वं ज्ञानं स्वत एव प्रमाणं स्वप्रकाशं च तद्धि प्रतिपन्नात् संवित्त्वगतव्यवहारं प्रति स्वाधीनसि
द्धिकरी॥ स्वसजातीयसंबंधानपेक्ष्य व्यवहारहेतुत्वात् प्रदीपवत्। न च चक्षुरालोकयोः। सजातीयत्वं अहंकारिकतैजसभेदाद्भेदः॥ अनेन ज्ञानस्य
क्षणिकत्वं चिरकालावस्थायित्वम्। प्रातिभासिकेव त्वं व्यवहारस्य मिथ्यात्वं परमः प्रामाण्ये ज्ञानस्यैव आत्मत्वमित्यादिपक्षाः निरस्ताः॥ स्तंभस्तंभ इत्या
दिधारावाहिकज्ञानं त्वेकमेव॥ ननु आगमवत्त्वात् ज्ञानस्य नित्यत्वं गीतादौ कथं जागरसुषुप्त्यादिभेदसिद्धिरिति चेन्न। यथा दाहकस्य वह्नेर्म
ण्यसन्निधौ मण्यादिप्रतिबंधकदौहितं यौवने आविर्भवति॥ धाप्रदापिन सत्यभावेः स तस्य गुण इति लक्षणलक्षितत्वात् ज्ञानं गुणः विशेष
णादिवत्॥ यतः संकोचविकाशावस्थावत् अतो द्रव्यमपि भवति। आत्मगुणभूतस्य [illegible] ज्ञानस्य द्रव्यत्वं कथमिति नक्तं कनीयप्रभावत्। एकस्मै
व द्रव्यत्वगुणत्वयोरविरोधाभावात्। अवस्थाश्रयो द्रव्यमिति द्रव्यलक्षणम्॥ स्वाश्रयादन्यत्र वर्तमानत्वमपि प्रभावदेवोपपद्यते। प्रयोग
श्च गुणाभूता बुद्धिर्द्रव्यं प्रसारणादिमत्त्वात् प्रभावत्। ज्ञानद्रव्यसंयोगादृष्टादस्य सतिभावनाकरणत्वात्। आत्मवत्। इति मुक्तज्ञानस्य यु
गपदनन्तदेहसंयोगः॥ न यतनस्यादीनि तेजोवत्संभवति॥ ज्ञानं मतिः प्रज्ञा संवित् धिषणा धीर्मनीषा शेमुषी मेधा बुद्धिरित्येवमादयः॥
शब्दा ज्ञानपर्यायाः॥ बुद्धिरेवोपाधिभेदात् सुखदुःखेच्छाद्वेषप्रयत्नस्वरूपाः॥ सुखादिजनकज्ञानातिरेके प्रमाणाभावात्। इच्छामि
द्वेष्मि इति व्यवहारस्य स्मरामीत्यादिवत् ज्ञानविशेषेणोपपत्तेः॥ ननु कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिरित्येतत्स
र्वं मन एवेति श्रुतेर्ज्ञानस्य स्वरूपत्वं कथमिति चेन्न। ज्ञानस्य मनःसहकारित्वनियमात्। मन एवेत्युपचारादुक्तमिति न विरोधः॥ एवं प्रसक्ता

निरस्कात्मानोनंगीकारात् मोक्षप्रवृत्तिरेव न संभवति। अन्येषां मते ज्ञानस्य क्षणिकत्वात्स्थैर्यासत्वात्कस्यप्रवृत्तिः॥ संतानस्येति चेन्न
अन्यं प्रति अन्येन यत्नो न कर्त्तव्य इति न प्रवृत्तिः॥ अपरेषां मते धर्माधर्म्मादि सप्तभंगीरीत्या अनैकान्तवादान्न प्रवृत्तिः॥ वैशेषिका
दिपक्षे पाषाणकल्पे मोक्षे प्रवृत्तिः कस्यापि न संभवति। सांख्यादिपक्षे पुंईश्वरानंगीकारात्। पुरुषस्य प्रकृतेर्वा मोक्ष इति संशयान्न प्रवृत्तिः॥
मायिमते व्यवहारिकवाक्यस्य परमार्थिकाभेदज्ञानाजनकत्वान्न प्रवृत्तिः॥ भास्करयादवोक्तकर्मज्ञानसमुच्चयवादोऽपि उक्तादेव निरस्तः।
शैवमते तु पशुपतेः प्राप्यत्वस्वीकारादेव विरुद्धभस्मधारणादेः साधनत्वेन स्वीकाराच्चैतन्निरासः॥ एवं मतिर्निरूपिता० इति श्रीवाधू
लकुलतिलकश्रीमन्महाचार्यस्य प्रथमदासेन श्रीनिवासदासेन विरचितायां यतीन्द्रमतदीपिकायां बुद्धिनिरूपणं नाम सप्तमोवतारः॥
13 ०।७॥ अथ जीवो निरूप्यते॥ प्रत्यक्त्वचेतनत्वात्मत्वकर्तृत्वादीनि ईश्वरजीवसाधारणानि लक्षणानि० प्रत्यक्त्वं नाम स्वयमेव स्वस्मै
भासमानत्वम्॥ चेतनत्वं ज्ञानाश्रयत्वं आत्मत्वं शरीरप्रतिसंबंधित्वम्० कर्तृत्वं संकल्पज्ञानाश्रयत्वम्० एवं सामान्यलक्षणलक्षितस्य वि
शेषलक्षणमुच्यते॥ अणुत्वे सति चेतनत्वं एवमाधेयत्वविधेयत्वपराधीनकर्तृत्वपरतंत्रत्वादिकमूह्यम्॥ स च देहेन्द्रियमनःप्राणा
दिभ्यो लक्षणः॥ यथा मम शरीरमिति प्रतीत्या देहाद्व्यावृत्तः॥ चक्षुषा पश्यामि श्रोत्रेण शृणोमि वाचा वदामि इत्यादिप्रत्ययात् बाह्येन्द्रियेभ्यो
व्यावृत्तः॥ मनसा जानामीति मनसः ज्ञानकरणत्वप्रतीतेः मम प्राण इति प्रतीतिव्यतिरेकोक्तेः॥ जानाम्यहमिति ज्ञानाश्रयान्मनःप्राणज्ञानेभ्यो
व्यावृत्तः॥ स चाणुपरिमाणः॥ उत्क्रान्त्यादेः श्रवणात् प्रमाणानुसाराच्च अणुत्वे युगपदनेकविषयानुभवः कथमिति न शंकनीयम्॥
धर्मभूतज्ञानव्याप्त्या उपपत्तेः एवमेव सौभरिप्रभृतीनां युगपदनेकशरीरपरिग्रहोपि संभवति॥ स च नित्यः॥ पूर्वानुभूतार्थप्रतिसंधा
नात् नित्यश्च जीव उत्पन्नो जीवो नष्ट इति प्रतीतिः कथमिति चेन्न॥ जीवस्य देहसंबन्ध उत्पत्तिः॥ तद्वियोगो नाश इति प्रतिपादनात् जीव

कल्याणानवसादानुद्धर्षरूपसाधनसप्तकजन्यः ॥ तत्र विवेको नाम जात्याश्रयनिमित्तादुष्टादन्नात्कायशुद्धिः ॥ विमोकः । कामानभि-
ष्वंगः अभ्यासः पुनः पुनरालंबनसंशीलनं । शक्तितः पञ्चमहायज्ञाद्यनुष्ठानं क्रिया. कल्याणानि सत्यार्जवदयादानाहिंसादीनि. अनवसादो
दैन्याभावः । अनुद्धर्षस्तुष्ट्यभावः । अतिसंतोषश्च विरोधी स्यात् ॥ एवं साधनसप्तकानुगृहीता भक्तिर्दर्शनसमानाकारा अन्तिमप्रत्ययावधिका च भवति.
स चान्तिमप्रत्ययः एतच्छरीरावसाने वा शरीरान्तरावसाने वा भवति वेदनध्यानोपासनादिशब्दवाच्या भक्तिः परभक्तिः ॥ परज्ञानपरमभ-
क्तिरूपत्रियावती प्रधानांगका च ॥ सा हि विद्या साधनभक्तिफलभक्तिभेदात् ॥ उक्तसाधनजन्या साधनभक्तिः फलभक्तिस्तु ईश्वरकृपा-
जन्या. परांकुशनाथादिनिष्ठा. मङ्कजेनयु[illegible]वा सत्यमित्यादिषु स्तुतिनमस्कारादिषु च भक्तिशब्दप्रयोग औपचारिकः ॥ ननु वेद-
नेश्रवणमननयोरपि विधानात्कथं ध्यानमेव विधीयत इति चेदुच्यते. अधीतसांगः वेदः पुरुषः प्रयोजनवदर्थावबोधित्वदर्शनात्. तन्नि-
र्णयाय स्वयमेव श्रवणे प्रवर्त्तत इति श्रवणस्य प्राप्तत्वादनुवादः ॥ श्रवणप्रतिष्ठार्थत्वान्मननस्याप्यनुवादः ॥ तस्मात् ध्यानमेव वि-
धीयत इति न विरोधः ॥ ध्यानशब्दवाच्या भक्तिर्विद्याभेदाद्बहुविधा. काश्चिद्विद्या उच्यन्ते. अन्तरिक्षविद्या अन्तरादित्यविद्या दहरविद्या
भूमविद्या सद्विद्या मधुविद्या उपकोसलविद्या शाण्डिल्यविद्या उद्गीथविद्या पुरुषविद्या प्रमर्दनविद्या वैश्वानरविद्या इत्यादिका
ब्रह्मविद्या. अंगन्यासविद्या प्रपत्तिः ॥ प्रपत्तिर्नाम आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनं रक्षिष्यतीति विश्वासः ॥ गोप्तृत्वव-
रणं तथा. आत्मनिक्षेपकार्पण्ये इत्यंगपंचकयुक्ता एतद्देहावसाने मोक्षप्रदा ॥ सकृत्कर्तव्या न्यासः ॥ शरणागतिः इत्यादिश-
ब्दवेद्या ज्ञानविशेषरूपा एषा प्रपत्तिः ॥ गुरुमुखादूहस्यशास्त्रेषु संप्रदाययत्नाद्वेदितव्येति ॥ इह बालबोधनार्थप्रवृत्ते ग्रंथेन
प्रकाश्यत इति विरम्यते. भक्तिप्रपत्त्योरेव मोक्षसाधनत्वेन स्वीकारात् परोक्तोपायनिरासः ॥ यथा वेदवादिनां मध्ये केचिन्मन्यन्ते देहा-

१४ रादयोवसवोरुद्राः आदित्याअश्विनौचदानवयक्षराक्षसपिशाचगुह्यकादयोएवंदेवयोनयोमनुष्यापिब्राह्मणक्षत्रियवैश्यशूद्रादिजा
तिभेदात्बहुविधाः तिर्यंचोपिपशुमृगपक्षिसरीसृपपतंगकीटादिभेदाद्बहुविधाः॥स्थावराअपिवृक्षगुल्मलतावीरुधतृणादिभेदाद्बहु
विधाः॥ वृक्षादीनांजलाहरणोपयुक्तंकिंचित्ज्ञानसंबंधोस्त्येव॥ अप्राणिषुस्वल्पासक्तत्वात्॥ अतोदेवमनुष्यतिर्यक्स्थावरभेदभिन्नाश्चत्वारः॥
जरायुजाअंडजोद्भिज्जस्वेदजाश्चभवन्तिदेवमनुष्याजरायुजाः॥ एवंतेषुब्रह्मरुद्रादयः॥ सनकादयश्चसीताद्रौपदीधृष्टद्युम्नादयः भूतप्रेतवेतालाद
यश्चअयोनिजाः॥ तिर्यगादयश्चजरायुजाः अंडजाः स्वेदजाश्चभवन्ति० स्थावरादयउद्भिज्जाः॥ एवंभूतावुक्ताः॥ वीजांकुरन्यायेनविषम
15 प्रवाहतयाअनादिकालप्रवृत्ताअविद्याकर्मवासनारुचिप्रकृतिसंबंधैश्चकेवलंपरिवृत्तमानेगर्भजन्मवाल्यपौगंडयौवनजागरस्वप्नसुषु
प्तिमूर्छाजरामरणस्वर्गनरकगमनादिविविधविचित्रावस्थावंतोअनाद्यनन्तप्रकाराअतिदुःसहतापत्रयाभितप्ताः स्वतःप्राप्तभगवदनुभववि
हेएवंतेश्चतेद्विधाः शास्त्रवश्यातद्वश्याश्चेति॥ तयोर्मध्येकरणायन्तृत्वानांवद्धानांशास्त्रवश्यतातिर्यक्स्थावरादीनांतन्नास्तिशास्त्रवश्याद्वि
विधाः॥ बुभुक्षवोमुमुक्षवश्चेति॥ तत्रबुभुक्षवः त्रैवर्गिकपुरुषार्थनिष्ठाः पुरुषास्तेचद्विविधाः अर्थकामपराधर्मपराश्चेतिकेवलार्थकामपरादे
हात्माभिमानवंतः॥ धर्मपराश्चअलौकिकश्रेयःसाधनंधर्मः चोदनालक्षणोर्थोधर्मइतिधर्मलक्षणलक्षितयज्ञदानतपस्तीर्थयात्रादि
निष्ठा॥ तेचदेहातिरिक्तात्मनःपरलोकोस्तीतिज्ञानवन्तः। धर्मपराद्विविधाः देवतान्तरपराभगवत्पराश्चेति॥ देवतान्तरपराब्रह्मरुद्रेन्द्रा
द्याराधनपराः॥ भगवत्पराश्चआर्त्तोऽर्थार्थीत्युक्ताधिकारिणः॥ आर्त्तोभ्रष्टैश्वर्यकामः॥ अर्थार्थीत्वपूर्वैश्वर्यकामः मुमुक्षवोद्वि
विधाः॥ कैवल्यपरामोक्षपराश्चेति॥ कैवल्यंनामज्ञानयोगात्प्रकृतिवियुक्तस्वात्मानुभवरूपानुभवः॥ अर्चिरादिमार्गेणपरमपदंगतएववक्
वित्कोणेपतितयत्कंयन्निन्यायेनभगवदनुभवव्यतिरिक्तस्वात्मानुभवइत्याहुः॥ केचिदर्चिरादिमार्गेणगतस्यपुनरावृत्त्यश्रवणात्प्रकृति

स्वरूपं नित्यमेव ॥ स च प्रतिशरीरं भिन्नः एकपरिमाणोऽप्यनेकेषु सुवर्णघटेषु एको घट इति प्रतीतिवत् ॥ श्रीहरिदासावेको श्रीहरिरितिवद्
ज्ञानैकाकारतया एकत्वव्यवहारः नतु स्वरूपैक्यं प्रमाणविरोधात् स्वतः सुखी दुपाधिभिस्तु संसारः ॥ अयं च कर्ता भोक्ता शरीरी शरीरं
च भवति प्र... पेक्षया शरीरी ईश्वरापेक्षया शरीरं तस्य प्रत्यक्षश्रुतिभ्यां स्वयंप्रकाशत्वं च सिद्धम् ॥ प्रयोगश्च आत्मा स्वयंप्रकाशः
ज्ञानत्वात् धर्मभूतज्ञानवदिति ज्ञातृत्वे अणुत्वामलत्वादय एतस्य स्वरूपनिरूपकधर्माः एतेन ज्ञानस्य क्षणिकत्वात् क्षणिकत्व
सन्तानरूपात्मेति बौद्धपक्षः ॥ भूतचतुष्टयात्मकत्वात् देहस्य देहाद्यधिक आत्मेति चार्वाकपक्षः गजदेहे गजपरिमाणः पिपीलि
कादेहे तत्सरिमाणः ॥ अतो देहपरिमाण आत्मेति जैनपक्षः ॥ कर्तृत्वभोक्तृत्वादिकं प्रकृतेरेव न तु पुरुषस्येति सांख्यपक्षः ॥ ब्रह्मणो जीव इति या
दवपक्षः सोपाधिब्रह्मखण्डो जीव इति भास्करपक्षः ॥ अविद्याकल्पितएकजीववादपक्षः ॥ अन्तःकरणावच्छिन्नअनेकजीववादपक्षः ॥ इत्येव
मादयो विरुद्धपक्षा निरस्ताः ॥ विभुत्ववादपक्षोपि न तु जीवस्य विभुत्वांगीकारे अदृष्टजनितदेशान्तरफलोपलब्धिः कथमिति चेन्न जीव
स्य संबंधाभावेपि अदृष्टवशादेवोपपद्यते ॥ अदृष्टं नाम भगवत्प्रीतिजनकजीवकर्तृककर्मविशेषजन्यो ज्ञानविशेषस्सविशेषो भगवत्संकल्पस्स्व
विभुस्वरूपं भगवन्तमाश्रितः ॥ अतो फलोपलब्धिरिति न विरोधः ॥ स जीवस्त्रिविधः ॥ बद्धमुक्तनित्यभेदात् ॥ तत्र बद्धा नाम अ
निवृत्तसंसाराः ते चतुर्दशभुवनात्मकाण्डकटाहवर्तिनो ब्रह्मादिकीटपर्यन्ताश्चेतनविशेषाः ॥ श्रीमन्नारायणनाभिकमलादुत्पन्नो ब्र
ह्मा ब्रह्मणो रुद्रः पुनर्ब्रह्मणः सनकादियोगिनो नारदादिदेवऋषयो वसिष्ठभृग्वादिब्रह्मर्षयः ॥ पुलस्त्यमरीचिदक्षकाश्यपादि
नव प्रजापतयो वसवः तेभ्यो देवाः दिक्पालाश्चतुर्दशेन्द्राश्चतुर्दशमनवः ॥ असुराः पितरः सिद्धगंधर्वकिन्नरकिंपुरुषविद्याध

गत्वाहिनपूर्वपक्षोत्तरायणाब्दवत्सराभिमानदेवताभिर्वायुना च पथि सत्कृतः सूर्यमंडलं भित्त्वा नभोरंध्रद्वारा सूर्यलोकम्

१५ सुषुम्णाख्यायां नाड्यां प्रविश्य ब्रह्मरंध्रान्निःक्रम्य हार्देन साकं सूर्यकिरणद्वारा अग्निलोकं गत्वा अनन्तरं चंद्रविद्युद्वरुणेन्द्रप्रजापतिभिर्मार्गप्रद
र्शिभिरातिवाहिकगणैः सोपचारैः सह तत्तल्लोकानतीत्य प्रकृतिवैकुंठसीमपरिच्छेदिकां विरजां तीर्त्वा सूक्ष्मशरीरं विहाय अमानवकर
स्पर्शात् अप्राकृतदिव्यविग्रहयुक्तश्चतुर्भुजो ब्रह्मालंकारेणालंकृत इंद्रप्रजापतिसंज्ञकनगरद्वारपालकाभ्यनुज्ञया श्रीवैकुंठा
ख्यं दिव्यनगरं प्रविश्य गरुडानंतयुक्तपताकालंकृतदीर्घप्राकारसहितगोपुरमतीत्य ऐरंमदाख्यामृतसरस्सोमसवनाख्याश्वत्थं
च दृष्ट्वा धातमालाहस्तैः सुक्तपंचशतदिव्याप्सरोगणैः रूपचरितो ब्रह्मगंधादिभिरलंकृतस्तत्र स्थानं तत्र गरुडविष्वक्सेनादीन् प्रणम्य तै
15 बहुमतो महामणिमंडपमासाद्य पर्यंकसमीपे स्वाचार्यान् प्रणम्य पर्यंकसमीपं गत्वा ॥ धर्मादिपीठोपरि कमले अनंते विमलादिभिश्चा
मरहस्तैः सेव्यमानं श्रीभूलीलासमेतं शंखचक्रादिदिव्यायुधोपेतं जाज्वल्यमानकिरीटमकरकुंडलग्रैवेयहारकेयूरकटकश्रीवत्सकौ
स्तुभमुक्ताहारोदरबंधनपीतांबरकांचीगुणनूपुराद्यपरिमितदिव्यभूषणभूषितं अपरिमितोदारकल्याणगुणसागरं भगवन्तं दृष्ट्वा तत्सा
दारविंदयुगले शिरसा प्रणम्य पादेन पर्यंकमारूह्य तेन स्वांके स्थापितः कोसीति पृष्टः ब्रह्मप्रकारोस्मीत्युक्त्वा तेन कटाक्षितः ॥ तदनुभवजनित
हर्षप्रकर्षात् सर्वदेशसर्वकालसर्वावस्थोचितसर्वविधकैंकर्यरतिः आविर्भूतगुणाष्टकः उत्तरावधिरहितब्रह्मानुभववान् यः स मुक्त इत्यु
च्यते ॥ मुक्तस्य ब्रह्मसाम्यान्ति श्रुतिस्तु भोगसाम्यमाह ॥ जगद्व्यापारवर्जनस्य प्रतिपादनात् तस्य नानात्वं सर्वलोकसंचरणत्वं च संभवति ॥ ननु मु
क्तस्य अनावृत्तित्वप्रतिपादनादस्मिंल्लोके संचारः कथमिति न शंकनीयं कर्मकृतत्वस्यैव निषेधात् स्वेच्छया संचरणोपपत्तेः ॥ अतो मुक्तो
भगवत्संकल्पायत्तस्वेच्छया स्वैरं संचरति ॥ नित्यानां कदाचिदपि भगवदभिमतविरुद्धाचरणाभावेन ज्ञानसंकोचप्रसंगरहिताः अनंतगरुड
पि१

१५

मंडलएव क्वचिद्देशे स्वात्मानुभवं स्यादुः ॥ मोक्षपराश्च द्विविधाः ॥ भक्ताः प्रपन्नाश्चेति ॥ भक्ताः पुनरधीत सांगशिरस्कवेदाः पूर्वोत्तरमीमांसापरिच
यात्सचिदचिद्विलक्षणमनवधिकातिशयानंदस्वरूपं निखिलहेयप्रत्यनीकसमस्तकल्याणगुणात्मकं ब्रह्मावधार्य तत्प्राप्त्युपायभूतां सांग
भक्तिं स्वीकृत्य तया मोक्षं प्राप्तुकामाः ॥ भक्तावधिकारस्त्रैवर्णिकानामेव देवानामप्यस्ति ॥ अर्थित्वसामर्थ्ययोः संभवात् न शूद्राधिका
रः अंगसहिताध्ययनविधिविरोधात् ॥ भक्तिस्वरूपं तु बुद्धिपरिच्छेदे प्रतिपादितं ॥ भक्ताः द्विधाः साधनभक्तिनिष्ठाः ॥ साध्यभक्तिनिष्ठाश्चेति
व्यासादयः साधनभक्तिनिष्ठाः ॥ परांकुशादयः साध्यभक्तिनिष्ठाः आकिंचनानन्यगतित्वधर्मविशिष्टो भगवन्तमाश्रितः प्रपन्नः सोपि द्विविधः ॥
त्रैवर्गिकपरो मोक्षपरश्चेति त्रैवर्गिकपरो नाम भगवत एव धर्मार्थकामाभिलाषी ॥ मोक्षपरस्तु सत्संगान्नित्यानित्यविवेके सति संसारे निर्वेदाद्दे
रागेऽपि उत्पन्ने मोक्षेच्छायां जातायां तत्सिद्ध्यर्थं आचार्यो वेदसंपन्न इत्याद्याचार्यलक्षणलक्षितं सद्गुरुं संश्रित्य तद्द्वारा पुरुषकारभूतां श्रियं प्रप
द्य भक्त्याद्युपायान्तरे अशक्तः अनर्ह एवाकिंचनानन्यगतिः श्रीमन्नारायणचरणावेव उपायत्वेन यः स्वीकरोति स प्रपन्नः प्रपत्तिः सर्वाधि
कारः ॥ स च प्रपन्नो द्विविधः ॥ एकान्ती परमैकान्ती चेति यो मोक्षफलेन साकं फलान्तराण्यपि भगवत एवेच्छति स एकान्ती देवतान्तरसन्यइस
पेः ॥ भक्तिज्ञानाभ्यामन्यफलं भगवतोपि योनेच्छति स परमैकान्ती ॥ स द्विविधः ॥ दृप्तः आर्तश्चेति ॥ अवश्यमनुभोक्तव्यमिति प्रारब्धकर्मानु
भवेन एतद्देहावसानसमये समीक्षमाणो दृप्तः ॥ जाज्वल्यमानाग्निमध्यस्थितस्येव संसारावस्थितेरतिदुःसहत्वात् प्रपत्त्युत्तरक्षणमोक्ष
काम आर्तः ॥ मुक्तो नाम उपायपरिग्रहानन्तरं निषिद्धनैमित्तिकभगवदाज्ञाकैंकर्यरूपाणि स्वयंप्रयोजनतया कुर्वन् भगवद्भागवता
पराधांश्च वर्जयन् देहावसानकाले सुकृतदुष्कृते मित्रामित्रयोर्निक्षिप्य वाङ्मनसीत्यादिप्रकारेण हार्दपरमात्मनि विश्रम्य मुक्तिद्वारभूत

प
१६

कांक्षायाम्॥ श्रुतिप्रसिद्धेः इन्द्रो वा तथा प्रसिद्धेः ऽग्निर्वा उपास्यत्वेन तथा प्रसिद्धः॥ सूर्यो वा कारणत्वेन उक्तः सोमो वा भीष्टफलप्रदत्वेन उक्तः।
कुबेरो वा यमो वा वरुणो वेति विषये एते पांकर्मवश्यत्वपरिच्छिन्नैश्वर्यत्वसंहार्यत्वश्रवणात् नैते जगत्कारणभूताः किंतु श्वेताश्वतरे
शिवस्य कारणत्वं भासते इति भात्येवमथर्वशिखायामपि शंभुशब्दवाच्यस्य ध्येयत्वे कारणत्वं भासते॥ तथैव अथर्वशिरसि रुद्रशब्दवा
च्यस्य सर्वात्मकत्वोच्यते तैत्तरीये हिरण्यगर्भस्य जगत्कारणत्वं प्रतीयते॥ अत्रापि सामान्यविशेषन्यायात् शिवशंभुरुद्रशब्दानां हिरण्य
गर्भवाच्यविशेषपर्यवसाने प्राप्ते शिवशब्दस्य शिवमस्तु सर्वजगतां॥ शिवं कर्मास्तु पंथानः सन्तु ते शिवा इत्यादिभिर्मंगलवाच्यत्वम्॥
रुद्रशब्दस्य अग्निवाचकत्वम्॥ एवमीश्वरशंभ्वादिसामान्यशब्दा अपि अवयवशक्त्या चतुर्मुखपर्यवस्यन्ति कारणवाचिशिवादि
16 शब्दानां मुख्यवृत्त्या रुद्रपरत्वं वा किन्न स्यादिति न शंकनीयं रुद्रस्य चतुर्मुखादुत्पत्तिश्रवणात्॥ अनपहतपाप्मत्वश्रवणाच्च न रुद्र
स्य कारणत्वम्॥ अतो हिरण्यगर्भप्रजापतिस्वयंभुवादिशब्दवाच्ये चतुर्मुखे शिवादिशब्दाः पर्यवस्यंति॥ एवमपि महोपनिषन्नारा
यणोपनिषत्सु वा लोपनिषन्मैत्रावरुणी पुरुषसूक्त नारायणानुवाकान्तर्यामिब्राह्मणादिषु नारायणस्यैव परमकारणत्वस
र्वेशत्वाच्यत्व मोक्षप्रदत्व जगच्छरीरत्वादेः प्रतिपादनात्स्वयंभूहिरण्यगर्भप्रजापतिशब्दानां नारायणे पर्यवसानं युक्तमि
ति॥ नारायण एवाखिलजगत्कारणं सर्वविद्यावेद्यश्च॥ नन्वुत्तरादित्यविद्या रुद्रपरेति शंका न कर्त्तव्या॥ तस्याविष्णुपरत्वस्येव बहु
प्रमाणप्रसिद्धत्वात्॥ भर्गशब्दस्य सकारान्तत्वप्रतिपादनाच्च॥ तथैव दहरविद्यायामाकाशशब्दवाच्य नारायणान्तर्यामितया रुद्रस्य प्रति
पादनाद्दहरविद्या रुद्रपरेति न शंकनीया॥ नारायणान्तर्वर्त्तिगुणजातस्यैव उपास्यत्वेन तत्राभिधानात्॥ एवं सर्वविद्यास्वप्यूह्यम्॥ अतः स
द्या

१६

विष्वक्सेनादयः॥ तेषामधिकारविशेषाः॥ ईश्वरस्य नित्येच्छयैव अनादित्वेन व्यवस्थिताः॥ एतेषामवतारास्तु भगवदवतारवत्स्वेच्छया एव
वमुक्तनित्यभेदभिन्नो जीवो निरूपितः॥ इति श्रीवाधूलकुलतिलक श्रीमन्महाचार्यप्रथमदासेन श्रीनिवासदासेन विरचितायां
यतीन्द्रमतदीपिकायां जीवनिरूपणं नामाष्टमोऽवतारः॥८॥ अथेश्वरो निरूप्यते॥ सर्वेश्वरत्वं सर्वशेषित्वं सर्वकर्माराध्यत्वं
सर्वफलप्रदत्वं सर्वाधारत्वं सर्वकार्योत्पादकत्वं स्वज्ञानस्वेतरसमस्तद्रव्यशरीरत्वं इत्यादीनि ईश्वरलक्षणानि अयमीश्वरः सूक्ष्मचिदचि
द्विशिष्टवेषेण जगदुपादानकारणं भवति संकल्पविशिष्टवेषेण निमित्तकारणं कालान्तर्यामिवेषेण सहकारिकारणं च॥ कार्यरू
पेण विकारयोग्यं वस्तूपादानकार्य्यं तया परिणामयत् निमित्तं कार्य्यं समस्तूपकरणं वस्तु सहकारि। यद्वा उत्तरोत्तरावस्थाविशिष्टस्व
स्वरूपापेक्षया तदनुगुणानियतपूर्वभाव्यवस्थाविशिष्टं तदुपादानं यथा घटत्वावस्थाविशिष्टमृद्रव्यापेक्षया पिण्डत्वावस्थाविशिष्टं तद्द्रव
द्रव्यम्॥ परिणामोन्मुखव्यतिरिक्तेनाकारेण अपेक्षितं कारणं निमित्तम्॥ अस्मिन्पक्षे सहकारिकारणस्य निमित्तेऽन्तर्भावः॥ एवं त्रिविधका
कारणपक्षे कारणद्वयपक्षे च कारणलक्षणलक्षितत्वादखिलजगत्कारणत्वं भगवतो नारायणस्यैव संभवति॥ ननु कथं नाराय
णो कारणत्वपर्यवसानमिति चेदुच्यते॥ सामान्यहितवेदान्तवाक्यविचारे एवं पर्यवस्यति॥ तद्यथा आदौ तावत् प्रकृते जगत्कारणत्वं
नोपपद्यते ईक्षत्याद्यभावात्॥ छान्दोग्ये तावत्सदाकाशप्राणशब्दवाच्यानां जगत्कारणत्वं प्रतीयते वाजसनेयके ब्रह्मशब्दवाच्य
स्य कारणत्वं प्रतीयते॥ सर्वशाखाप्रत्ययन्यायेन कारणवाक्यानामेकविषयत्वे प्रतिपादयितव्ये गोपशुन्यायेन सामान्यवाचकानां सदादि
दानां विशेषब्रह्मणि पर्यवसानं वक्तव्यम्॥ एवमुक्तन्यायेन ब्रह्मसंभवस्य तैत्तिरीयोक्ते आत्मशब्दवाच्ये पर्यवसाने आत्मशब्दवाच्यः कः

पृ.
१८

नन्त इत्युच्यते ॥ अनन्तो नाम त्रिविधपरिच्छेदरहितः ॥ त्रिविधपरिच्छेदस्तु देशतो कालतो वस्तुतः परिच्छेदः ॥ सत्यत्वज्ञानत्वानंदत्वा
मलत्वादयः ॥ ईश्वरस्य स्वरूपनिरूपकधर्माः ॥ ज्ञानशक्त्यादयो निरूपितस्वरूपधर्माः ॥ सर्वज्ञसर्वशक्तित्वादयस्सृष्ट्युपयुक्त
धर्माः ॥ वात्सल्यसौशिल्यसौलभ्यादयः ॥ आश्रयणोपयुक्तधर्माः ॥ कारुण्यादयो रक्षणोपयुक्तधर्माः ॥ एतेषां स्वरूपं बुद्धिप
रिछेदे निरूपितमिति इह न प्रपंच्यते ॥ अयमीश्वरो अंडसृष्ट्यनंतरं चतुर्मुखदक्षकालादिषु अन्तर्यामिरूपेण च स्थित्वा सृष्टिं
करोति ॥ विष्ण्ववताररूपेण मनुकालाद्यंतर्यामिरूपेण च स्थित्वा रक्षको भवति ॥ रुद्रकालान्तकादीनामन्तर्यामितया संहार
मपि करोति ॥ अतः सृष्टिस्थितिसंहारकर्त्ता च भवति ॥ एवंप्रकारः ईश्वरः परव्यूहविभवान्तर्याम्यर्चावताररूपेण पं
17 चप्रकारः ॥ तत्र परो नाम त्रिपाद्विभूतौ कुमुदकुमुदाक्षपुंडरीकवामनशंकुकर्णसर्पनेत्रसुमुखसुप्रतिष्ठितादिभिः ॥ दिव्या
युधभूषणपरिजनपरिच्छदान्वितैः ॥ दिव्यनगरपालकैः ॥ परिरक्षिते श्रीमद्वैकुण्ठाख्यपुरे चंडप्रचंडभद्रसुभद्रजयविजय
धातृविधातृप्रभृतिभिर्द्वारपालकै रूपेण श्रीमद्दिव्यालये श्रीमहामणिमण्डपे धर्मादिपादविरचितसिंहासने शेष
पर्य्यंके दिव्यमंगलविग्रहविशिष्टश्चतुर्भुजः श्रीभूलीलासहितः ॥ शंखचक्रादिदिव्यायुधोपेतः ॥ श्रीमत्किरीटादिदिव्य
व्यभूषणभूषितः ॥ अनन्तगरुडविष्वक्सेनादिभिर्नित्यैः सामगानपरैः अन्यैर्मुक्तैश्चानुभूयमानज्ञानशक्त्याद्य
नन्तकल्याणगुणविशिष्टः ॥ परब्रह्म परवासुदेवादिशब्दवाच्यो नारायणः ॥ व्यूहो नाम पर एव उपासनार्थं जगत्सृष्ट्या
द्यर्थं च वासुदेवसंकर्षणप्रद्युम्नानिरुद्धभेदेन चतुर्धावस्थितः ॥ तत्र षड्गुणपरिपूर्णो वासुदेवः ॥ ज्ञानबलाभ्यां संकर्षणः ॥

मस्तकल्याणगुणात्मकः प्रकृतिपुरुषाभ्यां भिन्नः ताभ्यां विशिष्टः परं ब्रह्म जगत्कारणं ॥ नन्वद्वैतश्रुत्या ब्रह्मैकमेव सत्यं निर्गुणं चैतद
न्यत् सर्वं तन्नेत्यादिके तस्मिन्नेव परिकल्पितं सर्वं मिथ्या ब्रह्म अविद्यया संसरति ॥ तत्त्वमसीत्यभेदज्ञानं तन्निवर्त्तकम् ॥ तस्मान्नि
र्विशेषचिन्मात्रब्रह्मणि वेदान्तानां तात्पर्य्यमिति मतान्तरस्थैः प्रतिपादनात्कथं नारायणे तात्पर्य्यं तस्य समस्तकल्याणगुणात्म
कत्वादिकथनं चेदुच्यते ॥ कारणत्वप्रतिपादकश्रुतिभिर्नारायणस्य कारणत्वे सिद्धे भेदाभेदश्रुत्योर्घटकश्रुत्या विषयभेदेन अविरोधे
प्रतिपादिते निर्गुणप्रतिपादकश्रुतीनां हेयगुणनिषेधकत्वात् ॥ ज्ञातः सोयादिकस्त्विकाविद्यायाः अप्रामाण्यात् ॥ ब्रह्मकार्य्यस्य सत्य
त्वात् ॥ अविद्यायाः संसारे जीवगतदोषाणां ब्रह्मण्यप्रसंभवात् ॥ तन्निवर्त्तकान्तरस्य वक्तुमशक्यत्वाद्देनोऽद्वैतवादस्यासंभवात् ॥
न निर्विशेषचिन्मात्रब्रह्मसिद्धिः ॥ अतो नारायणस्यैव जगत्कारणत्वमोक्षप्रदत्वादिगुणयोगः संभवतीति सविशेषमेव ब्रह्म ॥
सूक्ष्मचिदचिद्विशिष्टं ब्रह्म कारणम् ॥ स्थूलचिदचिद्विशिष्टब्रह्म कार्य्यमिति कारणादनन्यत्वात्पर्यामि तोविशिष्टाद्वैतवेदान्तिनां
सिद्धान्तः ॥ एवमीश्वरांगीकारात् निरीश्वरसांख्यमीमांसकादिमतनिरासः ॥ तस्यैव उपादानत्वादिस्वीकारात् योगपाशुपतनैया
यिकानां मतनिरासः ॥ तेनिमित्तमात्रेश्वरांगीकारात् ॥ ईश्वरस्य कार्य्यप्रतिउपादानत्वं निमित्तत्ववत् ॥ कर्तृत्वप्रेरकत्वनियंतृ
त्वसहकारित्वोदासीनत्वादिकमप्युपपद्यते ॥ बाल्ययौवनावस्थादयो दोषाः प्रधानशरीरगताः ॥ ननु शरीरिणो जीवे एवं चिदचित्स्वशरीरिणः
परमात्मनोपीति नाविकारश्रुतिविरोधः ॥ नियमेना[illegible]धेयत्वविधेयत्वशेषत्वादेः शरीरत्वलक्षणस्य जगति विद्यमानत्वाज्जगच्छरीर ईश्वरः ॥
तद्गतदोषैरसंस्पृष्टश्च ॥ स चेश्वरो विभुस्वरूपः ॥ विभुत्वं नाम व्यापकत्वं तच्च ईश्वरस्य त्रिधा० स्वरूपतो धर्मभूतज्ञानतो विग्रहतश्च सचा

प.

रजोगुणस्तु रागाद्यात्मकः कर्मसंगि दुःखादिहेतुः स्वर्गाद्यामुक्तिरुं
प्रदः तमोगुणस्तु शोकमोह आलस्यादिहेतुः त्रुटिः ७

१८ संयोगरहितमद्रव्यम्· तद्रव्यं च सत्त्वरजस्तमांसि गुणाः स्पर्शरूपरसगंधाः संयोगः शक्तिरिति दशप्रकारमेव· तत्र प्रकाशसुखलाघवादि
निदानमतींद्रियं गुणत्रयातिरिक्तमद्रव्यं सत्त्वम्॥ तद्द्विविधं शुद्धसत्त्वं मिश्रसत्त्वं चेति॥ रजस्तमःशून्यद्रव्यवर्त्ति सत्त्वं शुद्धसत्त्वं तच्चिद्विभ
तौ उपचारात्तत्प्रवर्त्तकेश्वरे च॥ रजस्तमःसहवर्त्ति सत्त्वं मिश्रसत्त्वं तत्त्रिगुणे तत्त्वे बंधिजीवे चोपचारादिति ज्ञेयम्॥ लोभप्रवृत्त्यादिनि
दानमतींद्रियं गुणत्रयातिरिक्तमद्रव्यं रजः॥ प्रमादमोहादिनिमित्तमतींद्रियं गुणत्रयातिरिक्तमद्रव्यं तमः॥ एतेष्वेतानि यावत्सक
ल व्याप्तानि प्रकृतिवश्यपुरुषसंबद्धान्यनित्यानि नित्यसंतानि प्रलयदशायां समानि सृष्ट्यादौ विषमानि॥ सृष्टिस्थितिसंहारोपयु
क्तानि ईश्वरसंकल्पादिसहकारिभेदात्॥ परस्पराभिभवोद्भवकराणि इत्येतानि साधारणानि॥ सत्त्वगुणस्तु सत्त्वज्ञानरूपसुखा
दिहेतुः मोक्षप्रदश्च॥ अतः सत्त्वादयो गुणा द्रव्यरूपाः॥ अस्मदादिश्रोत्रग्राह्यः पंचभूतवर्त्ती शब्दः स द्विविधः॥ अ
18 वर्णात्मको वर्णात्मकश्चेति॥ अकचटतपत्वादिविशिष्टपंचाशदक्षरात्मको वर्णात्मकः॥ देवमनुष्यादीनां ताल्वादिव्यंग्यः॥ भेर्यादिज
न्यो अवर्णात्मकः एवंभूतः शब्दः श्रोत्रेंद्रियेण गृह्यते श्रोत्रेंद्रियगमनाद्वा शब्दजनकवाय्वागमनाद्वा शब्दग्रहः॥ ननु स्थूलाशब्दस्य द्र
व्यत्वं प्रतीयते॥ अहमेवैकं धूमिति चेन्न अकारादेः प्रत्येकं वा सादृकत्वं वा अद्वाशासंभवतीतिपरिहाराद्द्रव्यत्वमुपपद्यते॥ अस्म
दादिस्पर्शनेंद्रियग्राह्यो विजातीयव्यावर्त्तमद्रव्यं स्पर्शः॥ स च त्रिविधः॥ शीतोष्णानुभयात्मकभेदात्॥ अप्सु शीतस्पर्शः तेजस्सु उष्ण
शीतोष्णेतिपवनयोरनुष्णाशीतस्पर्शः॥ स च पुनर्द्विविधः॥ पाकजोऽपाकजश्चेति पृथिव्याः पूर्वः इतरेषु त्रिषु उत्तरः॥ तत्रामृतगरल
तैलोपलशोभ्राह्मणचंडालादिस्पर्शविशेषाः पाकजभेदाः इति स्पर्शः॥ अस्मदादिचक्षुरिंद्रियैकग्राह्यं विजातीयव्यावर्त्तमद्रव्यं रूपम्
तच्च शुक्लश्वेतरक्तपीतकृष्णभेदात्॥ तत्र सलिलशंखशुक्तिकाशोकादीनां रूपविशेषाः श्वेतभेदाः॥ हुतवहजपादाडिमबंधुजीवविद्रु
मपद्मरागादीनां तु रूपविशेषा रक्तभेदाः॥ कांचनहरितालहरिद्रादीनां पीतभेदाः॥ मरकतमधुकरजलधरतिमिरतमालदूर्वादि

ऐश्वर्यवीर्याभ्यां प्रद्युम्नः। शक्तितेजोभ्यामनिरुद्ध इति गुणविभागः॥ एतेभ्यश्चतुर्भ्य एकैकस्य त्रयस्त्रयोऽवतीर्णाः। केशवादयो व्यूहान्तराणि द्वादशमासानां द्वा
दशादित्यानां च आधिदैवतानि ऊर्ध्वपुण्ड्रेषु तेषामेव स्थानं विधीयते॥ तत्र कनकप्रभः केशवश्चतुश्चक्रधरः॥ श्यामो नारायणश्चतुःशंखधरः। मणि
प्रभो माधवश्चतुर्गदाधरः। चन्द्राभो गोविन्दश्चतुःशार्ङ्गधरः। पद्मकिंजल्कसन्निभो विष्णुश्चतुर्हलधरः। अग्निवर्णस्त्रिविक्रमश्चतुःखड्गधरः।
बालसूर्याभो वामनश्चतुर्वज्रधरः। पुण्डरीकाभः श्रीधरश्चतुःपट्टिशधरः। तडित्प्रभो हृषीकेशश्चतुर्मुद्गरधरः॥ सूर्याभः पद्मनाभः पञ्चायुधधरः।
इन्द्रगोपनिभो दामोदरश्चतुःपाशधरः॥ विभवो नाम तत्तत्सजातीयरूपेण आविर्भावः। स दशधा। ते च मत्स्यादयोऽवतारविशेषाः॥ प्रलये प्रमाल
प्रत्यर्थी मत्स्यावतारः॥ अमृतोत्पादने मन्दरधराधरधरत्वेन अवतीर्णः कूर्मावतारः॥ भूम्युद्धरणार्थमवतीर्णो वराहः॥ आश्रितसंरक्षणार्थं म
हासुरस्तम्भे अवतीर्णो नृसिंहावतारः। त्रिविक्रमो भूत्वा स्वपादारविन्दोद्भवेन जलेन जगत्पापहरत्वेन रूपेणावतीर्णो वामनः॥ दुष्टक्ष
त्रियनिरसनार्थं परशुरामः। शरणागतरक्षणधर्मस्थापनार्थं श्रीरामः। प्रलम्बादिनिरसनार्थं बलभद्रः॥ गोरक्षणाय दुष्टनाशार्थं श्रीकृष्णः। कलिनि
मोचनार्थं कल्क्यवतारः॥ एवमेकैकावतारेषु अनन्तप्रकाराः सन्ति॥ षट्त्रिंशद्भेदभिन्नाः पद्मनाभादयोऽपि पुनर्द्विभिन्नाः हयग्रीवनरनाराय
णादयोऽपि एवं मुख्यगौणपूर्णांशावेशाद्यवताराः बहुप्रकाराः॥ तेषु उपास्यानुपास्यविभागो द्रष्टव्यः॥ अत्र तारतम्ये हेतुः न कर्म॥ प्र
प्रयोजनं तु दुष्कृतविनाशपूर्वकं साधुपरित्राणमेव॥ अन्तर्यामित्वं नाम स्वर्गनरकाद्यनुभवदशायामपि जीवात्मनः सुहृत्त्वेन योगिभिर्द्र
ष्टव्यतया हृदयप्रदेशावस्थितरूपम्॥ जीवेन साकं विद्यमानोऽपि तद्गतदोषैरसंस्पृष्टो वर्तते॥ आर्चावतारो नाम देशकाल [redacted]
विप्रकर्षरहित आश्रितनिमित्तद्रव्यादिकं शरीरत्वमास्थीकृत्य स्निग्धालकतल्पीर निविष्टः सन्नर्चकपराधीनस्नानभोजनासनशयनस्थितिः
सर्वसहिष्णुः परिपूर्णः गृहग्रामनगरप्रशस्तदेशशैलादिषु वर्तमानो मूर्तिविशेषः॥ स च स्वयंव्यक्तदैवसैद्धमानुषभेदात् चतुर्विधः॥ एवमुक्तो
सुपंचावस्थास्वपि श्रीविशिष्ट एव भगवान् वर्तत इति श्रुत्याप्रमाणसिद्धोऽर्थः॥ तेन एकायनमतमपि श्रीकवचेन निरस्तः॥ एवमीश्वरो निरूपितः॥ इति श्री
वाधूलकुलतिलकश्रीमन्महाचार्ये यतीन्द्रमतदीपिकायां ईश्वरनिरूपणो नाम नवमोऽवतारः॥ ९॥ इदं द्रव्यनिरूपणानन्तरं क्रमप्राप्तमद्रव्यं निरूप्यते॥

134

१ त्रापीति॰ शक्तिर्नाम धर्मविशेषः सिद्धः ।। ननु चतुर्विंशतिप्रकाराः गुणाः इत्युक्तत्वात् कथं दशैवेति निर्दिश्यत इति चेदुच्यते ।। जीवासमवेतविशेषगुणानां
बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां धर्माधर्मयोः ज्ञानविततिरूपत्वेन ज्ञानान्तर्भावस्य उक्तत्वात् ।। धर्माधर्मयोरपि ईश्वरप्रीत्यप्रीतिरूपत्वेन ईश्व
रज्ञानेऽन्तर्भावात् ।। भावनाख्यसंस्कारस्य ज्ञानविशेषरूपात् वेगोत्पादकहेतो बाणादेरेव वेगाख्यसंस्कारोपपत्तेः ।। संयोगमादाय स्थितिस्थाप
कस्यापि संभवात् ।। शब्दस्पर्शरूपरसगंधानां पंचानां प्रत्यक्षसिद्धत्वेन अंगीकारात् ।। विभागपृथक्त्वयोरपि संयोगाभावमादायोपपत्तेः
परत्वापरत्वयोः देशकालसंयोगविशेषमादायोपपादयितुं शक्यत्वात् ।। संख्यापरिमाणद्रवत्वस्नेहानां तत्तद्द्रव्यस्वरूपमादायोपपत्तेः ।
गुरुत्वस्य शक्त्यन्तर्भावस्य वक्तुमुचितत्वाच्च दशैवेति सूक्ष्मं सत्त्वरजस्तमांसि प्रकृतिगुणाः ।। तत्संबंधजीवगुणाश्च सत्त्वरूपज्ञानं संसा
त्विकः कालः इत्यादिप्रतीतिरूपाद्यवस्थादोपचारिकः ।। शब्दादयः पंचप्रकृतिकार्यपंचमहाभूतगुणत्वेन प्रसिद्धाः ।। शुद्धसत्त्वं तु त्रि
पाद्विभूत्यां तत्प्रवर्त्तकेश्वरे च ।। संयोगशक्तिरूपो गुणो षड्द्रव्यसाधारण इति विवेकः ।। इत्यदृष्टं निरूपितम् ।। एवं द्रविडभाष्यन्याय
19 तत्त्वसिद्धित्रयश्रीभाष्यदीपसारवेदार्थसंग्रहभाष्यविवरणसंगतिमालाषडर्थसंक्षेपश्रुतप्रकाशिकालतत्त्वरत्नाकरप्रज्ञापरित्रा
णप्रमेयसंग्रहन्यायकुलिशन्यायसुदर्शनमानयाथात्म्यनिर्णयन्यायसारतत्त्वदीपनतत्त्वनिर्णयसर्वार्थसिद्धिन्यायपरिशुद्धिन्यायसिद्धांज
नपरमतभंगतत्त्वत्रयचुलकतत्त्वनिरूपणतत्त्व [illegible] त्रयप्रचंडमारुतवेदांतविजयपाराशर्यविजयादिपूर्वाचार्यप्रबंधानुसारेण ज्ञात
व्याख्यानसंगत्यनुगुणवेदार्थयतींद्रमतदीपिकाख्या शारीरकपरिभाषायां संक्षेपतः प्रतिपादिताः ।। अध्यात्मशास्त्राणां तत्त्वहितपुरुषार्थप्रति
पादकत्वात् ।। तत्सारिस्मिन्नपि प्रकरणे जीवेश्वरपरिच्छेदे तत्त्वस्य निरूपणात् ।। बुद्धिपरिच्छेदे उपायस्य निरूपणात् । नित्यविभूतिपरिच्छेदे ईश्व
रपरिच्छेदे च पुरुषार्थनिरूपणात् तत्तोपायपुरुषार्था निरूपिता इति निरवद्यम् ।। एवं तत्त्वत्रयमिति प्रतिपादयंति [illegible] सूत्रयः ।। आत्मा
अनात्मेति विभज्य द्वेधा निरूपयंति सूत्रयः ।। श्रुत्यनुसारात् भोक्तृभोग्यनियंतृरूपेण तत्त्वत्रयमिति प्रतिपादयंत्याचार्याः ।। इयं तस्यानि ६

नीलत्वभेदाः ॥ पीतत्वादिरवान्तरभेदं केचिद् वदन्ति ॥ शुक्लं तु प्रकारान्तरेण द्विधा ॥ भास्वराभास्वरभेदात् ॥ तेजोगतं भास्वरं क्षितिसलिल
गतं चाभास्वरं ॥ एवं चत्वार्येव रूपाणि तेन चित्रं नाम पंचमं रूपमिति मतं निरस्तः ॥ अस्मदादिजिह्वैकग्राह्यो विजातीयेतरो रसः स षोढा ।
मधुराम्लवणकटुकषायतिक्तभेदात् ॥ तत्रेक्षुक्षीरगुडादिरसः मधुरभेदः ॥ चूतचिंचामलकादिरसः आम्लः ॥ सैंधवोषरविकारा
दिभेदः लवणभेदः ॥ किंपाकनिंबादिरसः कटुकभेदः ॥ शुंठिमरीचसर्षपादिरसा ऊषणभेदाः ॥ हरितकीविभीतकचूतांकुरादिरसाः
कषायभेदाः ॥ इति रसः ॥ अस्मदादिघ्राणग्राह्यो विजातीयेतरो गंधः स द्विधा ॥ सुरभिरसुरभिश्चेति ॥ पटीरमृगमदचंपकावं
पकादिगंधाः सुरभिभेदाः ॥ अयं च गंधस्तु पृथिव्येकवृत्तिः पाकजभेदाद्भिन्नः ॥ पवनशलिलादिषु गंधोपलब्धिः पार्थिवसंसर्गात् ॥ अपोदृ
तीति वैशेषिकाः ॥ पंचीकरणप्रक्रियायां सर्वभूतेषु सर्वगुणानां विद्यमानत्वमपि प्राधान्याभिप्रायेण उक्तमिति न विरोधः ॥ पाकाद्गुण
न्तरोत्पत्तिस्त्वाश्रयनाशाभावादेवेति तैः पीलुपाकवादिमतं निरस्तं ॥ संयुक्तप्रत्ययनिमित्तं संयोगः स च सामान्यगुणः ॥ बहुद्रव्यवृत्तिः
। अस्य च स्वभावस्य देशमुपलभ्यमानमंशेनैव प्रयुक्ततया न विरोधाद्वहं सकार्याकार्यभेदाद्द्विविधः ॥ पूर्वं परिमितानोद्भयप्रेर
णात् ॥ यथा मेषयोर्मल्लयोर्वा केचिदन्यतरप्रेरणात् यथा स्थाणुश्येनयोः संयोगः केचित् संयोगजसंयोगजमपि वर्णयंति ॥ हस्तपुस्तकसंयो
गात्कायपुस्तकसंयोग इति तन्न हस्तसंयोगादेव कायसंयोगस्य जातत्वात् ॥ एतेन विभागजविभागो निरस्तः ॥ विभागो हि संयोगाभाव एव न पृथग्गु
णः अकार्यसंयोगस्तु विभुद्रव्ययोरजद्रव्यसंयोगः ॥ सोऽङ्गीक्रियते ॥ अनुमानात् अजसंयोगसिद्धिः ॥ यथा विभुद्रव्यं विभुद्रव्यसंयोगवत् द्रव्य
त्वात् घटवत् विभुद्रव्यमीश्वरसंयुक्तं द्रव्यत्वात् घटवत् ईश्वरः कालादिसंयुक्तः ॥ द्रव्यत्वात् घटवत् इत्यादिभिर्विभुसंयोगसिद्धिः ॥ अथ शक्तिः सर्व
कारणानां कारणत्वनिर्वाहकः कश्चिद्द्रव्यविशेषः शक्तिः तर्कागमाभ्यां तत्सिद्धेः प्रतिबंधकमणिमंत्रादिसन्निधौ स्वरूपसहकारिवैकल्याभावेऽपि यदुप
वेधाद्वह्निना न दहति सा चातीन्द्रिया शक्तिः ॥ अयस्कांतादिषु तत्र सिद्धिः ॥ सा शक्तिः षड्द्रव्यवृत्तिः ॥ भगवन्निष्ठत्वे पुराणरत्नादिषु प्रसिद्धम् ॥ एवं सर्व

स्वीकं उपादेयं तस्य उपाय इति चतुर्द्धा विभज्यानुसंदधते केचिदाचार्य्याः ॥ प्राप्यं प्राप्तोपायः फलं विरोधीति पंचार्थानि रूपयंति ॥ अर्थपंचकमे
व सम्बंधेन साकं षोढा परिगणयन्त्य वर्णा यान्ति तेषां तत्तद्विभाजके धर्म्ममात्र पञ्चानुसंधानमुपपद्यते ॥ वस्तुतस्तु वेदांतानां चिदचिद्विशि
ष्टाद्वैतमेव ब्रूते इति तात्पर्यम् ॥ अत एव चिदचिद्विशिष्टं ब्रह्मैकमेवेति मत्वा भगवान् बादरायणः ॥ अथातो ब्रह्मजिज्ञासेत्युपक्रम्य तमेव प्र
कारं निरूपितवान् ॥ अं तच्चिदचिद्विशिष्टो ब्रह्मशब्दवाच्यो विश्वाख्यः परवासुदेवो नारायण एवैकं तत्त्वमिति विशिष्टाद्वैतवादिनां दर्शनमिति सि
द्धम् ॥ इति विविधविचित्रमानेमेव प्रकाशयन् गुरुवरदासेनोक्तमाध्वयशास्तात् · यतिपतिमतदीपं वेदवेदान्तसारं स भवति मतिमान् यः सत्के
वसेकल्पः ॥१०॥ इति श्रीमद्वाधूलकुलतिलक श्रीमन्महाचार्यस्य प्रथमदासेन श्रीमद्वेङ्कटगिरिनाथपदकमलसेवापरायणस्वामिपु
ष्करणी गोविंदाचार्यसूनुना श्रीनिवासदासेन विरचितायां यतीन्द्रमतदीपिकायां अद्रव्यपरिच्छेदो नाम दशमोवतारः ॥१०॥१०॥ श्री
रस्तु स्फुरत्सहस्रारशिखातितीव्रं सुदर्शनं भास्करकोटितुल्यं सुरद्विषां प्राणविनाशि विष्णोश्चक्रं सदाहं शरणं प्रपद्ये ॥१॥ विष्णोर्मुखो
त्थानिलपूरितस्य यस्य ध्वनिर्दानवदर्प्पहन्ता ॥ तं पाञ्चजन्यं शशिकोटिशुभ्रं शंखं सदाहं शरणं प्रपद्ये ॥२॥ हिरण्मयीं मेरु
समानसारां कौमोदकीं दैत्यकुलैकहन्त्रीम् ॥ वैकुंठनामाग्रकराभिमृष्टां गदां सदाहं शरणं प्रपद्ये ॥३॥ रक्षोसुराणां कठिनो
ग्रकंठच्छेदक्षरच्छोणितदिग्धधारम् ॥ तं नंदकं नाम हरेः प्रदीप्तं खड्गं सदाहं शरणं प्रपद्ये ॥४॥ यज्ज्यानिनादश्रवणात् सुराणां चेतांसि
निर्मुक्तभयानि सद्यः ॥ निहत्य दैत्याः सन्निपातवर्षैः शार्ङ्गं सदाहं शरणं प्रपद्ये ॥५॥ इदं हरेः पंचमहायुधानां स्तवं पठेद्योनुदिनं प्र
भाते ॥ समस्तदुःखानि सद्यः नश्यन्ति समस्तपापानि सुखानि संति ॥६॥ ६७ ॥ अभिगमनोपादानेज्या स्वाध्याययोगाख्ये ये पञ्चकालम् ·

वै दिकांग्रं

यतीन्द्रमतदीपिका

प. २.

21